DPN 6386

Title : चिकित्सा सार CIKITSĀSĀRA.

Run. No. 7077 Cat. No. Micro. No.

Subject Medicine Religion : Hindu / Bauddha

Language : Skt. / New. / Nep. / Skt.- New. / Maith.- New. / New.- Nep. /

Size in cms. 27×10.4 Folios 109 Lines (in a page) 7

Compl. / Incompl. Chapt. / act /

Author / translator गोपालदास Gopal Dass. Scribe / donor जिनेन्द्रमुनि ब्रह्मचर्य भिक्षु

Date: NS / SS / VS / KS 1922 Ruler / place Jinendra Muni Brahma

Script : New. / Dev. / Bhuj. / Ran. / Illus. : Charya Bhikkhu.

Material : palmleaf / paper / thyasaphu / one side yellow

Condition : fine / damaged by worms, rats, water /

Beginning, colophon, post-colophon :

□ श्रीगणेशाय नमः ॥ △ ॥ श्रीगुरु गणपति शारदेष्ट देवताभ्यो नमः ॥ अथ चिकित्सासारो लिख्यते ॥ ॥

P.T.O.

ऋग्वेदस्योपवेदोयमायुर्वेदः प्रचक्षते ॥ तस्य संख्या परीमाणं लक्षैकमृषयो विदुः॥
परं परोपकारार्थं मदृष्टं मद्धृतं मया ॥ निखातं तच्च संक्षिप्तं वैद्यानां मशदायकं॥५॥
शकुन ॥ नाडी परीक्षा ॥ कालज्ञान ॥ ऋतुप्रकोप ॥ दोषोत्पत्ति ॥
पथ्यवर्ग ॥ इति चिकित्सासारे वैद्यकोशद्वयम् ॥
रस उपरस शोधन ॥ इति शोधन मारणाधिकारः समाप्तः ।

चिकित्सा सार नामाग्रं ग्रन्थः परमदुर्लभः ॥ श्रीमद् गोपालदासेन वादीन्द्रेण च धीमता॥
परोपकार पुण्याय प्रयासेन विनिर्मितः ॥
आत्रेय सुश्रुतं छन्दं हारीतं चरकं तथा ॥ आत्रेय वाग्भटं चैव सिद्धं सार रसादिकं॥
बहूनां ग्रन्थ माचार्याणां सारमुद्धृत्य यत्नतः ॥ श्रुतं दृष्टं वाचानुभूतं तत्सर्वं लिखितं मया
△ इति श्रीमद् वादींद्र गोपालदास विरचित चिकित्सासारो ग्रन्थः समाप्तः॥
संवत् १९२२ साल मिति चैत्र शुक्ल सप्तम्यां रविवारे लिखितं ब्रह्मचर्य
भिक्षु श्रीजिनेन्द्रमुनि ॥ शुभं ॥

चिकित्सा सार
ले. गोपाल दास
सं. १९३२

चिकित्सासार

चि॰
१

श्रीगणेशायनमः॥ ॥श्रीगुरुगणपतिशारदेभ्योदेवताभ्योनमः॥ ॥अथचिकित्सासा
रोलिख्यते॥ ॥यशत्यरोपःपुरुषःपुराणःसनातनोयोपिचविश्वकर्त्ता॥यस्यांतपारंनविदुर्यथापि
विदुर्हिदेवास्तमहंनमामि॥ १ ॥यद्वेदाःसकलोपवेदयतःप्रज्ञाताउतसृष्टिकाले॥केनात्रस
र्वेप्रकटीकृतास्तेपरोपकारायतमुद्भजेहं॥ २ ॥ऋग्वेदस्योपवेदोयमायुर्वेदःप्रवक्ष्यते॥तस्यसंख्या
परीमाणंलक्षैकमृषयोविदुः॥ ३ ॥संहिताचरकग्रंथदेशभाषादिभेदतः॥विस्तृतावहवोत्रैव
तत्सारंकथितोयथा॥ ४ ॥परंपरोपकारार्थंयदृष्टंयद्धृतंमया॥लिख्यतेतत्तुसंक्षिप्तंवैद्यानांयश
स्करं॥ ५ ॥चिकित्सारत्नमायंग्रंथंपरमदुर्लभः॥श्रीमद्गोपालदासेनक्रियतेपठितप्रियः॥ ६

सा

गुरु
१

अथदूतपरिक्षा॥ क्रुद्धौदूतौगुरवजटिलौस्त्रीनरौगौरक्तहस्तौचिंताक्रांतौतृणाक्षतकरौस्पर्शतेभूम्य
भंगं॥ दुष्टंकृतेविकलवदनःशीघ्रकार्यीचिंतनीदृष्ट्वापृष्टेवदतिलिखितेमातिवैद्योनिरीक्ष्य॥ ७
दुःखंगीतंदुतंदीनंरुक्षोमंगलवादिनं॥अमंगलंचमलिनंशस्त्रिणांदंडपाणिनं॥ ८ ॥व्याधितं
क्रूरकर्माणंरक्तमाल्यानुलेपनं॥तैलपंकविलेपाढ्यमश्रुचिंक्लृप्तचामरं॥ ९ ॥अनेकजटि
लंशीर्णंविवर्णंद्वैकवाससं॥स्त्रियंखरीक्षुमहिषारुरुंकृष्णस्वरंतथा॥ १० ॥नानूगच्छेन्नि
घकदूतमाहूयतंचदूरतः॥ १० ॥अथशकुनानि॥दुर्गंधसकषायंचदुर्वाक्यंस्खलनंक्षु
तं॥हाहाक्रंदितमुत्कृष्टंक्लृप्तधान्यंगुडोवमी॥इंधनानितृणाशुष्कंपुरीषंपूतिदुर्मदं॥ १२॥

वि॰
२

क्रूरपक्षिमृगाणांवरुक्षाःप्रतिदिशंगिरः॥समरंकलहोहानिःपंकनैलंससर्षिषं॥ १२ ॥भंगो
वापूर्णयात्राणांप्रसादंध्वजशोभिनं॥ १३ ॥वाराजालक्रूरयाशांश्चतिसारंजालपागुरोः॥
शयनाशनयानानामुन्नानांवदर्शनं॥ १४ ॥मार्गेछेदोहिमार्जारगोधासरवानरैः॥रो
गीहारभिनिर्गछेत्संगलंतदमंगलं॥ १५ ॥पुन्नामावामतःश्रेष्ठागजाकर्वावर्जिताः॥स्त्रीना
मावामतःश्रेष्ठाशिवाश्यामाविवर्जिताः॥ १६ ॥छत्रंगोद्विजकन्याकायिषसुरायपरपंगनारोः
वनंमांगल्यंमयवारणादधिश्रोत्रादियाठःशुभः॥संगीतंकरुणाभयानकमहारोइंविहीनंः
स्मरन्क्रीडाभावसतोहरंकिमपिवबालानिसयोगिनः॥ १७ ॥इतिशकुनानि॥ ॥

गुरुः
२

अथनाडीपरीक्षा॥वातेवक्रातदनुवपलाश्लेष्मरोगेस्थिरास्यात्सर्पाकाराप्रवहतितदा वातपित्त
प्रभावे॥नाडीहंसीकपपवनयोर्दुराश्लेष्मपित्तेछिन्नाभूक्ष्माविवविषमदेसन्निपातेचल
क्षा॥ १९ ॥वातेवक्रगतानाडीवपलापित्तवाहिनी॥स्थिराश्लेष्मवतीज्ञेयाद्वंद्वजासन्निपात
जाः॥ २० ॥कार्मुकुठाराभिदंष्ट्राणांवक्रगतिसमन्विता॥सन्निपातोद्भवानाडीमाद्भवैद्यवि
वक्षणाः॥ २१ ॥मंदंमंदंशिथिलशिथिलव्याकुलंव्याकुलंवास्थित्वास्थित्वावहतिधमः
नीयातिनाशंवभूक्ष्मा॥नित्यंस्कंधेवहतिपुनरप्यंगुलिंसंस्पृशेद्वाभावैरेभिर्वहुविधतरैः
सन्निपातेत्वराध्या॥ २२ ॥प्रातःश्लेष्मपुन्नानाडीमध्याह्नेवापिपैत्तिकी॥अपराह्णेवात

चि॰
३

कीवपुनःपित्तंनिशार्द्धके॥ २३ ॥अथमूत्रपरीक्षा॥रक्तंपीतंतथाश्वेतंकृष्णंश्वेतंयथाक्रमं॥
वातेपित्तेकफेप्रोक्तंसंनिपातेतुमुत्रकं॥ २४ ॥वातेतुरक्तमुत्रत्वंपीतवर्णंतुपित्तजे॥माणवर्णं
भवेच्छ्लेष्माकृष्णवर्णंत्रिदोषजे॥धूमलेवातपित्तेनकेनिलेकफमारुते॥श्लेष्मवातसमुद्भूतंस
त्रंकुंकुमपांडुरं॥प्रातरग्रभवंधारांश्चत्वामूत्रंरोगिणाः॥तत्रतैलतवंक्षिप्तासाध्यासाध्यंवि
चिंतयेत्॥ २७ ॥वातेविस्तरतच्छायापित्तेभवतिबुद्बुदं॥श्लेष्मणिउदयाकारमसाध्यंतरगं
यदि॥विस्तृतेबहुशःसाध्यमूर्द्धगेकृच्छ्रसाध्यमः॥ २८ ॥तरगेम्रियतेरोगीव्रसणाधिविस्तित
ः॥विकाशिचेत्तैलमथाभुमूत्रेसाध्यःसरोगीनविकासितश्चेत्॥ २९ ॥सांकष्टसाध्यस्तरगे

गुरुः
३

त्वसाध्योनागार्द्धनेनैवहृतापरीक्षा॥ ३० ॥वातेशीघ्रंजायतेवपित्तेसद्योहेमवर्णंविभाति॥तैलंजे
यंबुद्बुदाभंकफेवात्रैगुणंतद्दृश्यतेवत्रिदोषे॥ ३१ ॥अथकालज्ञानं॥अरुंधतीध्रुवंचैवविष्णोस्त्री
णिपदानिच॥आयुर्हीनानपश्यंतिचतुर्थेमातृमंडलं॥ ३२ ॥नासाग्रंभ्रूयुगंजिह्वांमुखंचैवन
पश्यति॥कर्णघोषंनजानातिसगच्छेद्यमंदिरं॥ ३३ ॥नवभ्रूयंववक्षश्चसप्तकर्णत्रिमासकं॥
त्रिहांवदिनमेकंतुकालविहूंदिनेदिने॥ ३४ ॥अकस्माचभवेत्स्थूलोअकस्माच्छ्लक्ष्णोभवेत्॥
अकस्मादन्यथाभावःमरणासाच्चविनश्यति॥ ३५ ॥औषधंनमलंमंत्रंसत्यन्याश्चविविधक्रि
या॥यस्यायुस्तस्यसिद्ध्यंतिनासिध्यंतिगतायुषि॥अग्निमूलंबलंपूसांरेतोमूलंचजीवितं॥तस्मात्सव

प्रयत्नेन वह्निं शुक्रं च रक्षयेत्॥ रसनायाः कृष्णभावो मुखं कुंकुमसन्निभं॥ जिह्वा स्वल्पखरस्पर्शा दुर्बलं
भं तस्य जीवितं॥ ३९ ॥ सूर्ये कैंद्रेश्वरमतिनरो शीतवातं ववंद्वे भौमे रक्तं गुरु भृगवो रोगनिर्मुक्तकाया
स्युः॥ मंदं मंदं शिथिलमरणं जीवनाशं च राहु लग्नेशस्ते ग्रहबलयुतं यातिवैद्योनिरीक्ष्य॥ ४० ॥
रात्रौ दाहो भिभवति दिवा जायते शीतलत्वं कंठश्लेष्माविरसवदनं कुंकुमाकारनेत्रे॥ जिह्वा कृष्णा भ
वति वसदास्थूलशूक्ष्मा च नाडी तद्वैद्यस्य स्मरणमधुना रोमरणमेति रुग्णः॥ ४१ ॥ सौम्या दृष्टिर्वदति वि
मलं हृत्तया दौर्बल्यादाहः सुरसवदनं कोमलायस्य जिह्वा॥ नासाश्वासो वहति सरलः स्वेदहीनो
ज्वरो सौ साध्यो रोगी भवति नियतं वैद्य भैषज्ययोग्यः॥ ४२ ॥ अथ ऋतुप्रकोपः॥ मार्गे यो वेन तथा माघे

आषाढे श्रावणे पि च॥ भाद्रपदे चिकित्सन्नैवातो राजा प्रकिर्तितं॥ ४३ ॥ आश्विने कार्तिके मासे वैशाखे ज्ये
ष्ठयोर्ध्रुव॥ सर्वशास्त्रविचारज्ञैः पित्तं राजा प्रकिर्तितः॥ ४४ ॥ फाल्गुने चैत्रमासे तु जेतुपीडा करो मतः॥ शी
तलाडुसमूद्भूतः श्लेष्मा राजा प्रकीर्तितः॥ ४५ ॥ सेधारणाशनजागरणाच्च भाषव्यायामयानकटुति
क्तकषायरूक्षे॥ चिंताध्ववायभयलंघनशोकभीतैर्वायुप्रकोपमुपयाति घनागमे च॥ ४६ ॥ कटुम्ल
लवणोष्णविदाहितीक्ष्णैः क्रोधातपानलपरिश्रमशुष्कशाकैः॥ क्षाराम्लजीर्णविषमाशनभोजनैश्च
पित्तप्रकोपमुपयाति घनात्ययेव॥ स्वप्नादिवामधुरशीतलमत्स्यमांसैर्गुर्वन्नपिच्छलतिलेक्षुपयोविका
रैः॥ स्निग्धातितृप्तिलवणोदकपानभक्ष्यैः श्लेष्मा प्रकोपमुपयाति तथा वसंते॥ ४८ ॥ इति वातपि

वि॰
५

त्रप्रकोपः॥ इत्येवमेतेक्रमशोद्विशोवादोषाःप्रदुष्टायुगपत्त्रयोवा॥ कुर्वंतिरोगान्विविधान्शरीरे संख्यान
तज्ञानगतानने कान्॥ पारुष्यसंकोचनतोदशूलशोषत्वमंगव्यवेष्टभंगान्॥ सुप्तत्वशीतत्वखरत्वशोषा
:कर्माणिवायोःप्रवदंतितज्ज्ञाः॥ ५० ॥परिश्रमस्वेदवसाहरागवैगंध्यविक्लेदविपाककोठाः॥ प्रलापमू
र्छाभ्रमपित्तदाहाःपित्तस्यकर्माणिवदंतितज्ज्ञाः॥ श्वेतत्वशीतत्वगुरुत्वकंडूस्तैमित्यदेहस्तिमितत्वशोषा
न्॥ उत्सेधसंक्रांतिचिरक्रियोश्चकफस्यकर्माणिवदंतितज्ज्ञाः॥ ५१ ॥इतिदोषत्रयलक्षणा॥ सन्तानि
लिंगानिवतन्तुतानांसर्वामयानामपितैकनाम्नां॥ कश्चिद्भवेत्प्राप्तिविशेषहेतुःसंज्ञांतरंयेनवमप्रयांति॥
५३ ॥आलस्यतंद्राहृदयाविशुद्धिर्दोषप्रवृत्तिर्घनतावमूत्रे॥ गुरूदरत्वारुचिसुप्तभिन्नामान्वितंव्याधि

गुरुः
५

मुदाहरंति॥ ५४ ॥इतिसामरोगलक्षणं॥ स्निग्धोष्णस्थिरभोज्यपथ्यलवणास्वाद्वम्लतैलातपस्नानाभ्यंग
नवस्तिमांसमदिरामंवाहनोद्वर्तनैः॥ स्नेहस्वेदनिरूहणास्यशयनस्थानोपनाहादिकंपानाहारविहार
भेषजमिदंवायुंप्रशांतिनयेत्॥ रक्तस्वादुकषायशीतपवनच्छायानिशावीजनंस्नोत्स्नाभूगृहवारियंत्र
जलजस्त्रिगात्रसंस्पर्शनं॥ सर्पिःक्षीरविवेकसेकरुधिरस्रावप्रदादिकंपानाहारविहारभेषजमिदंपित्तंप्र
शांतिनयेत्॥ रूक्षक्षारकषायतिक्तकटुकंव्यायामनिष्ठीवनंस्त्रीसेवाश्वतिमुद्गनागरजलक्रिडापदाघा
तनं॥ धूमस्तायशिरोविरेकवमनंस्वेदोपवासादिकंपानाहारविहारभेषजमिदंश्लेष्माणमुग्रंजयेत्॥
५७ ॥इतिदोषत्रयशमनं॥ हेमंतवर्षाशिशिरेषुवायोःपित्तस्यतोयांतिनिषेध्ययोश्च॥ कफस्यकोप

वि
६

:कुसुमागमे वक्तुवीनयत्नं विहितं तथैषां॥ ५८ ॥ एवं हि वसंतस्यान्मध्याह्नो ग्रीष्म उच्यते॥ अपराह्णो भ
वेद्वर्षा दिनमध्ये ऋतुत्रयं॥ ५९ ॥ रात्रौ प्रथमे वर्षा स्यान्निशीथे वशरत्स्मृता॥ हेमंतोन्यः परं रात्रेरेवं षट्
ऋतवः स्मृताः॥ ६० ॥ कफोदयो वसंते स्याद्ग्रीष्मे पित्तोदयस्तथा॥ वातोदयस्यात्वर्षासु पित्तं शरदि कुप्यति॥ ६१ ॥ इति दोषोत्पत्तिः॥ अथ पथ्यप्रकारः॥ आमंजये लंघनकोलयेयलघ्वन्नरूक्षोदनतिक्त
यूषैः॥ निरूहणैः स्नेहनपाचनैश्च संशोधनैरूर्द्धमधः तथा च॥ ६२ ॥ कफप्रकोपे वमनं शमस्यं
विरेचनं पित्तभवे विकारे॥ वातामये वस्तिविशोधनं च संसर्गजे च प्रविमिश्रमेतत्॥ बुध्यात्तदन्यद
न्यदपि तत्तदनुक्रमेण चेष्टां स्वयं समधिगम्य यथा सुहृद्यं॥ रोगेषु भेषजमनन्यमतीव विद्यात्॥ शा

गुरुः
६

स्त्रं हि किंचिदुपदेशवलं करोति॥ ६४ ॥ श्वेतारक्ताः स्थूलसूक्ष्मा ये वान्ये शालयः शुभाः॥ स्वादुपाकरसास्नि
ग्धा एष्यावह्वा लघवश्च सः॥ ६५ ॥ कषायानुरसाः पथ्या लघवो मत्स्यलाहिमाः॥ षष्टिकाव्रीहिमुद्गेष्टा गो
राश्च पित्तगौरकः॥ ६६ ॥ रूक्षः शीतो गुरुः स्वादुः मरो विदूवान्हृच्छवः॥ संधानकारी मधुरो गोधूमः स्वे
यहृत्सरः॥ ६७ ॥ सुगंधरस्त्रिदोषघ्नः स्वादुपथ्यो रसायनः॥ मुद्गाढकीमसूरादि शिंबीधान्यं विबंध
कृत्॥ कषायं स्वादुसंग्राहि कटुपाकि मलघु॥ मेदःश्लेष्मास्रपित्तेषु हितं लेपे यसकयाः॥ वरोत्रमुद्गोः
त्यवलः कलापश्चात्रिवातलः॥ वनकावातरक्तघ्नं कुलित्थं कफवातहृत्॥ ७० ॥ वास्तुकं ग्रहणीदु
ष्टत्रिदोषार्शोहरं सरं॥ तद्वल्लपुवित्रीकावमाचीचमेथिका॥ ७१ ॥ तंदुलीयो हिमो रूक्षो विषघ्नो

दला

स्वकासजित्॥ चांगरीकफवातास्रसंग्रहणपित्तसारजित्॥ ७२ ॥हृद्यंपथ्यंलघुक्रिमिजित्स्वादुशीतंरुचिप्रदं
॥पित्तरंदीपनंभेदिवातघ्नंबृहतीद्वयं॥ ७३ ॥कालवेरसतिक्तमाद्दीपनंकफजित्परं॥कर्कोटजंज्व
रश्वासदुष्टकुष्ठविषापहं॥ ७४ ॥वार्ताकंकफवातघ्नंकिंचिद्वातप्रकोपनं॥सरलंसूत्रलेप्रोक्तंवलकृ
द्बलमेवतत्॥ ७५ ॥बिंबीफलंस्वादुशीतंस्तंभनंलेखनंगुरु॥पित्तास्रदाहशोफघ्नंवाताध्मान
विबंधकृत्॥ ७६ ॥वृष्यंवर्णकरंवल्योजननंपित्तापहंवातजित्मूत्राघातहरंपरमेहशमनंकृच्छ्र
श्मरीभेदनं॥ ७७ ॥विरामूत्रालयनंतृष्णार्तिशमनंक्षीणांगपुष्टिप्रदंकूष्मांडंप्रवरंवदंतिभिष
ग्जीवत्तीफलानांपुनः॥ ७८ ॥जलजंपद्मकंदादिगाहिपित्तासृहृद्गुरु॥दीपनःसूरणोरुच्यःक

कार्शोघ्नोसुहृद्वपुः॥ ७९ ॥आर्द्रपावनदीपनंरुचिकरंवृष्यंकटुक्लेवरंस्वर्यंमेदहरंत्रिदोषशमनं
शोफार्यहृच्छूलजित्॥जिह्वाकंठविशोधनंसलवणंपथ्यंसदाभोजने॥निंबूनायविमिश्रितंरुचिकरंसं
दीपनंसारणं॥ ८० ॥भूकंदस्तंनिवातलोवलकलःश्लेष्माणमत्यर्थहृद्भीगुरुमेदसोतिवि
षमोवातामयंदीपयेत्॥मेहंकुष्ठरुजंकरोतिसततंतद्वातरक्तंमहत्॥पिंडालुःक्रिमिकुष्ठकृ
द्भ्रमलहृत्पित्तामयध्वंसकः॥ ८० ॥शाकोरुकंपित्तशीतंमूत्रघ्नंरुचिकारकं॥पत्रेपुष्पफलेनालेकं
दैवैगुरुताक्रमात्॥ ८१ ॥कंदास्तुवातलाःसर्वेकफात्रीर्णाकरात्पराः॥दाडिमंग्राहिदोषघ्नंरोचनंहृद्य
दीपनं॥ ८२ ॥तद्वदामलकंपथ्यंमधुराम्लरसंसरं॥दोषघ्नंलकुचंस्वादुपित्तलंभग्नलंदिकं॥गुल्मवात

वि॰ ८

कफश्वासकाशघ्नं वीतपरकं॥ वाराक्षरुक्कृतं स्वं हृद्व्यथितानिलाग्निकृत॥ ८४ ॥द्राक्षा परुषः
कान्ताग्रमामपित्तकफप्रदं॥ द्राक्षा मधुरखर्जूरकाश्मर्यमपरुषकं॥ ८५ ॥वातपित्तस्रजिद्गुर्वी केश्यः
घ्नं वशमीफलं॥ अल्पसिकथा भवेत्येयावद्रूसिकथा विलेपिका॥ ८६ ॥मुनिभक्तो भवेन्मेदोप्रभूतस्त्वोद
नः स्मृतः॥ मंदश्चतुर्दशगुणो तोयसिक्तो यसिक्तकः॥ येयासिक्तयुता सिद्धा चतुर्दशगुणो भसि॥ विलेपी
घनसिकथा स्यात्सिद्धा तोयेचतुर्गुणे॥ मंडयेया विलेपीनामोदनस्य वलाघवं॥ यथा पूर्वे शिवस्तः
त्रमंदो वातानुलोमतः॥ तृष्णाग्निदोषशोषघ्नः पाचनो धातुसाम्यकृत॥ स्रोतोमार्दवकृत्त्वेदी [illegible]॥
८७ ॥विलेपी ग्राहिणी हृद्या तृष्णाघ्नी दीपनी हिता॥ व्रणाक्षिरोगसंशुद्धदुर्बलस्नेहपायिनं॥ ८८॥

गुरुः ८

संधुक्षयति वामतं

सुधौतः प्रसृतः स्विन्नस्तप्तो क्षात्चौदनो लघुः॥ मोक्षस्तु पथ्यः संशुद्धव्रणाकंठाक्षिरोगिणां॥ ८९ ॥वाता
मुलो मीकौलित्थो गुल्मतूणी प्रतूणिनित॥ ९० ॥इति पथ्यवर्गः॥ मूत्रेगव्यं तथाजं मनुजभवमपि
स्वदकं ऊविनाशं तिक्तं तीक्ष्णं लघूष्णं सलवणासुरसं पित्तलं भेदि रुक्षं॥ हृद्यं रुच्यं कृमिघ्नं कुतवहज
नकं कुष्ठमेदोविनाशं गुल्मार्शोनाहशूलोदरकफपित्तयोः॥ मूर्छाकृद्दिव्यरेदाहेतृष्णातीसारपीडि
ते॥ धातुक्षीणे विषार्ते वसन्नियातेविशेषतः॥ शस्तं विरोधिरोगेव श्रुतशीतं जलं सदा॥ ९१ ॥सुतशी
तोदकगुणाः॥ पार्श्वशूलप्रतिश्याये वातरोगे गलग्रहे॥ आध्माने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे॥
९२ ॥हिक्कायां स्नेहपीते च शीतांबु परिवर्जयेत॥ इति स्वरप्रतिश्यायकासमेदोरुविक्रमीत॥ ९३ ॥

वराकैर्विहितो यूषो नुष्णस्तु वरकोलघुः॥ रक्तपित्तप्रतिश्यायकारपित्तकफापहः॥ मकुष्ठयूषः संग्राही पित्तश्लेष्मज्वरापहः॥ लघुः संतर्पणाः पथ्योहृद्यः पीनसकासजित्॥ सचलो वातलश्लेष्मा मासयूषश्च पित्तकृत्॥ मसूरयूषः संग्राही वह्निस्वादुप्रमेहजित्॥ तथा कषायो मधुरश्च यूषो विशोषणो वातहरो रुचीनी॥ पित्तापहः श्लेष्महरो ज्वरारोगकृमीन्निहन्याद्गुदरारुणांच॥ वाग्भटः॥ वाग्भटाद्यैर्विभृष्टैर्लाजमंडस्तु शालिभिः॥ वाग्भटो लघुर्ग्राही श्रूलामाहृन्निरोधजित्॥ नवज्वरे पिपथ्यो यः पटुर्विश्वसमन्वितः॥ इति दुग्धोदकगुणाः॥ गुल्मार्शोग्रहणीक्षयेषु जठरे मंदानलाध्मानके शो फे पांडुगलग्रहे व्रणगदे हृद्वेदनेत्रामये॥ वातारुच्यतिसारकेकफयुते कुष्ठे प्रतिश्यायके दुग्धं वारि

सुशीतं श्रुतहिमं स्वल्पं प्रदेयं जलं॥ इति दुग्धोदकगुणाः॥ अजीर्णे चौषधं वारि जीर्णे वारि बलप्रदं॥ भोजने चामृतं वारि रात्रौ वारि विषप्रदं॥ पिबेत्घटसहस्रं तु यावन्नास्तमितो रविः॥ अस्तं गते दिवानाथे बिंदुरेकोपि यत्पतेत्॥ तत्प्रायः पिशाचसंसिक्तं लोकस्तेनावधीरितं जलं॥ सर्वदोषहरं पथ्यं सदा नैरुज्यकारकं॥ ८ ॥ उशीरमांसीसकर्पूरसुलालवंगकक्कोलसुवासितोष्णं॥ हरीतकीगंधसमं च भागं जलाधिवासः पृथिवीश्वराणां॥ इति जलवर्गः॥ गोक्षीरमनभिष्यंदि स्निग्धं गुरु रसायनं॥ रक्तपित्तहरं शीतं मधुरं रसपाकयोः॥ गव्यतुल्यगुणत्वान्न विशेषान्न शोधिणो हितं॥ दीपनं लघुसंग्राही विशेषं चापरं शृणु॥ अजानामल्पकायत्वाकटुतिक्तनिषेवणात्॥ नात्यंबुपाद्यायामात्सर्वव्याधिहरं पयः॥ १२ ॥ महाभि

घंदिमधुरं माहिषं वह्निनाशनं॥ निद्राकरं शीतकरं गव्यास्निग्धतरं गुरु॥ १३ ॥ इति क्षीरवर्गः॥ गव्यं तु
दीपनं तक्रं मध्यमं शीतवीर्यतु॥ माहिषं श्लेष्मलं तक्रं सांद्रं शोफकरं गुरु॥ सुस्निग्धं छागलं तक्रं लघु
दोषत्रयापहं॥ गुल्मार्शोग्रहणीशोफपांडामयविनाशनं॥ १५ ॥ घालमारुतपित्तहारि मथितं वातोप
हं श्लेष्महृत्पित्तश्लेष्मविनाशनं दधिकतक्रं त्रिदोषापहं॥ मंदाग्नावरुचौ तथैव नितरामन्येषु रोगे
ष्वपि॥ श्रेष्ठं तक्रमिदं वदंति मुनयस्तेनात्तमं प्राणिनां॥ १६ ॥ वातास्रमैथुनोपेतं स्वादुपित्तेन संसर्क
रं॥ पित्तेन तक्रं कफे चाग्नि व्योषक्षारसमन्वितं॥ १७ ॥ तक्रात्लघुतरं मथः कुर्विकादधितक्रव
त्॥ गोजामहिषिणां तक्रं तद्वद्दधिगुणाः पृथक्॥ १८ ॥ इति दधितक्रगुणाः॥ गव्यं वा माहि

षं वापि नवनीतं नवोद्धृतं॥ शस्यते वात्सवृद्धस्य बलकृद्धातुवर्द्धनं॥ १९ ॥ शीतं बलास्रमधुरास्त्रवृष्यं
श्लेष्मापहं पित्तमरुत्प्रणाशं॥ शोषक्षयक्षीणकृशातिवृद्धबालेषु पथ्यं नवनीतमुक्तं॥ २० ॥ इति नव
नीतगुणाः॥ सर्पिर्गवां वाप्यमृतं विषघ्नं चक्षुष्यमारोग्यकरं च वृष्यं॥ रसायनं मेदयनीवमध्यं स्नेहोत्तमं
चेति बुधा वदंति॥ २१ ॥ सर्पिर्माहिषमुत्तमं भ्रमिकरं सौख्यप्रदं कांतिदं वातश्लेष्मनिबर्हणं बलक
रं वर्णप्रसादक्षमं॥ दुर्नामग्रहणीविकारशमनं मंदानलोद्दीपनं चाक्षष्यं नवगव्यतः परमिदं हृ
द्यं मनोहारि च॥ २२ ॥ दीपनीयमतो सर्पिश्चाक्षष्यं बलवर्द्धनं॥ कामश्वासक्षये वापि पथ्यपानेषु
तत्लघुः॥ २३ ॥ इति घृतवर्गः॥ त्रिदोषघ्नं मधु प्रोक्तं मन्यतस्यात्सन्निपातहृत्॥ हिक्काश्वासकृमिछ

र्दिमोहतृष्णाविषापहं॥ २४ ॥इतिमधुगुणाः॥प्रस्थंचमधुनःक्षीरद्रवांचकुडवद्वयं॥निहृताभ्र
यारजोदआत्रत्येकंचपलपलं॥ २५ ॥मध्यावसानेविपचेत्मधुयाकत्वयेधिः॥शर्करासमवीर्यसुदे
ननिष्पीडितोरसः॥गुरुर्विदाहीविष्टंभीमांत्रिकसुप्रकीर्तितः॥सक्षारोमधुरोतिमूत्रवद्धलोरक्तसंशो
धनोमेदोहामिकरोतिपित्तशयनोवातघ्नविष्टंभनः॥श्लेष्मारांजनयंश्चहृद्रुगकरोवल्यःसदास्वास्थ्यकृ
द्घातघ्नोविषहास्रपित्तशमनोसेवोविरेकेसदा॥इक्षुगुणाः॥विरामूत्रामयनाशनोग्निजननःकंठ्यप्र
मेहान्नकृत्स्निग्धःस्वादुरसोलघुःश्रमहरःपथ्यपुराणोगुडः॥ २६ ॥दाहंनिवारयतिपित्तमयाकरो
तिनृष्णांछिनत्तिविनिहंतिवमोहमूर्छा॥शोषविनाशयतिशोधयतिंद्रियाणिशीतःसदासमधुरखलु

गुरुः
११

प्रुद्भवराः॥ ३० ॥मूर्छामोहतृषास्वंशोषशमनीदाहज्वरध्वंसिनी॥श्वासहृद्दिमहात्ययक्लमहरीहृद्यावसंतर्पणी॥क्षीरोरेतसिप्रावकेवविषमेक्षीरोक्षतेदुर्बले॥दुर्वारेपिवरक्तपित्तजगदेसेव्यासिताशर्करा॥ ३१ ॥इतिगुडखंडशर्करागुणाः॥कंडूहरंकांतिविवर्द्धनंबलवीर्यविवर्द्धनंतनुरोपणंच॥कृमीन्निहंत्याद्धलशुक्रकारीतैलंकृमिश्लेष्ममरुत्प्रणाशि॥इतितैलगुणाः॥कंडूस्नेसार्षपंतैलंकफशुक्रानिलापहं॥लघुवोष्णंसकृत्स्पर्शात्कुष्ठार्शोव्रणाजंतुजित्॥ ३२ ॥सार्षपतैलं॥आमवातगजेंद्रस्यशरीरवनवारिणाः॥एकस्वाग्रणीहंताएरण्डस्नेहकेशरी॥ ३४ ॥कटीतटनिकुंजेषुसवरंवातकुंजरः॥एरण्डतैलसिंहस्यगंधमाघ्रायधावति॥ ३५ ॥एरण्डतैलंकृमिनाशनंवसर्वत्रशूलघ्नमरुत्प्रणाशि॥कुष्ठा

वि.
१२

पहंवायिरसायनंवयिग्रप्रकोयातिलशोधनंच॥ ३९ ॥वह्नीगुल्मानिलकफानुदरंविषमज्वरान्॥व
तश्लगजेंद्राणामेरण्डस्नेहकेसरी॥सर्वधान्यसमावर्तेजानिफलानिच॥तैलवन्नानितस्नेपःस्वर्ज्ज
कंडूविनाशनः॥ ३८ ॥इतितैलवर्गः॥ ॥व्रणाशोधनसंधानरोपणंवातलंमधुः॥त्रिदोषघ्नंमधुपे
तंछर्द्दिश्वासविषापहं॥ ॥गुडेनतुत्थकंदद्यात्तडस्नवारिपिवेन्मुहुः॥पीत्वाशठकषायंवासिंधु
कल्कान्वितंवमेत्॥ ४० ॥रसटंकणतुत्थानिमर्द्दयेत्घटिकात्रयम्॥जीमूतीफलनीयेननीलकण्ठो
भवेद्रसः॥सशर्करंवल्लयुग्मंछर्दनाज्वरनाशनं॥पित्तादिश्वज्वरश्वासहिध्माकोष्ठादिदोषहा॥ ४२
॥रसगंधकणतुत्थदेवदारीफलरसेनमर्द्दनं॥ ४३ ॥इतिनीलकंठवमनं॥अथरेचनं॥ ॥

गृहः
१२

त्रिवृत्सैंधवशुंठीनांचूर्णमुष्णांबुरेचनं॥घोषदंतीत्रिवृत्तथ्यानीलिगुडिकाथवा॥हरीतकीभिःकथि
तंसुवीरंदंत्याग्निकल्कान्विडचूर्णमिश्रं॥विरेचनंतौरुतैलमिश्रंनिरस्यथेयोज्यमथामयघ्नं
२ ॥रसगंधंवमरीचंकंकणानागरभयाः॥जेयालवीजसंयुक्तंक्रमेणत्रिगुणंभवेत्॥मर्द्दयेद्दंडं
नीलैनइक्षाभेदिभवेभद्रसः॥वल्लद्वयप्रमाणोनपिबेद्वोष्णोदकंमुहुः॥रेचनंज्वरगुल्मंववातशूलान
वारणं॥ ५ ॥इतिइक्षाभेदरेचनं॥ ॥रसभागोभवेद्द्वौगंधंवद्विगुणंतथा॥टंकणंत्रि
गुणंभागानिशृंगवेरंचतुर्गुणं॥ १ ॥मरिचंपंचभागानिषड्भागंवहरीतकी॥जयालंसप्तभा
गानिशूक्ष्मचूर्णानिकारयेत्॥ २ ॥भृंगराजरसेनैवखल्येनिक्षिप्यमर्द्दयेत्॥वणप्रमा

णावटिकांगुडेनसहभक्षयेत्॥ ३ ॥उष्णंसेकादिकंकुर्यात्तप्तप्रतोयंमुहुर्मुहुः॥ आयानंरेचनंकु
र्याद्छर्दिजीर्णाज्वरनाशनं॥ ४ ॥जलोदरंकामलाचशोफःशूलविनाशनं॥ रसश्चिंतामणिःव्या
तःशूलपांडुदरंहरेत्॥ ५ ॥इतिचिंतामणिविरेचनं॥ लेभनंरेचनोनेवदध्योदनघृतोदनं
अहिफेनोत्थवानन्दभैरवोवानियोजयेत्॥ ॥अथनस्यं॥ नस्यंविधेयंगुडनागरेणजलेन
वासेधवपिप्पलीभ्यां॥ घ्राणास्यमन्याहनुवाकुपक्षशिरोक्षिकंठश्रवणामयेषु॥ भुक्तवत्यथवा
स्नातेनस्यंयोज्यंनकर्हिचित्॥ क्लाननस्यशिरस्नानंनोगदीश्चवियोजयेत्॥ अथरक्तप्रस्रावः॥ गृह॰
रक्तप्रभावाप्रभवंतिलोमास्तद्वैकुरुतेज्वरादीन्॥ तन्मोक्षणंतुविकयावशृंगाजलौकयावापि १३

मो

शिराविद्धात्॥ ॥इतिचिकित्सासारेवैद्यकौशल्यम्॥ ॥अथोपरसोपरसशोधनमारणाधि
कारः॥ ॥कुमारीत्रिफलाद्यौषधित्रकंनिंबुकंरसं॥ दिनैकमर्द्दनंकृत्वाशुद्धोभवतिपारदः॥ १॥
कर्कोटीमुशलीकंन्याडवंदत्वाविशोधयेत्॥ कुमार्याश्चनिशाचूर्णादिनमर्द्धंविशोधयेत्॥ २ ॥इति
रसशोधनं॥ सदुग्धभांडेरविलंविवस्त्रेस्थितंतिसध्याप्यवलिंपुटेन॥ दुग्धंगतोसौरसजारणा
यांरसेचयोगःसकलक्रियासु॥ १ ॥इतिगंधकशुद्धिः॥ मेषीक्षीरेणादरदमन्हवर्गैश्चभा
वितं॥ सप्तवारंप्रयत्नेनशुद्धिमायातिनिश्चितं॥ २ ॥तालकंपोटलीवश्वासमूत्रेकांजिकेप
चेत्॥ दोलायंत्रेणायामैकंततःकुष्माण्डजेरसे॥ १ ॥तिलतैलेपचेद्यामंयामंचत्रैफलेरसे॥ द्वि

लायंत्रेचतुर्थामंमेवंशुद्धतितालकं॥ २ ॥इतितालकशुद्धिः॥अथतिंड्रीकिलायंत्रेशुद्धत्वमन॥शिला
॥दिनमेकमजामूत्रेभृंगराजरसेपिवा॥ ३ ॥इतिमनसिलाशोधनं॥टंकणोनसमंपिष्ट्वाथवालपु
टेपचेत्॥तुत्थंशुद्धंभवेक्षौद्रेपुटितंवाविशोधनः॥इतितुत्थशुद्धिः॥अथहरितालयत्रनियोसेःशिग्रुं
मूलंसुपेषितं॥तन्मध्येपुटितंशुद्धंनिवुत्राम्लेनयाचितं॥इतिमाक्षिकशुद्धिः॥गोदुग्धैस्त्रिफलाक्वाथे
भृंगद्रावेश्वमर्दयेत्॥आतपेदिनमेकंतत्रस्थंशुष्कंतांत्रतेन॥इतिशिलाजतुशुद्धिः॥स्वेदयेस
लिकायंत्रेजयंत्यास्वरसेनवा॥मणिमुक्ताप्रवालानितथारत्नान्यनेकशः॥क्षारादिविधवर्णानि
म्रियंतेनात्रसंशयः॥उक्तमाक्षिकयन्मुक्ताप्रवालानिवमारयेत्॥वज्रवत्सर्वरत्नानिशोधयेन्मारयेत्

मणि
पा॥इतिमुक्ताप्रवालशुद्धिः॥मेरुछःस्याद्विमलाम्लसैंधवजलेपक्वोविशुद्धोभवेत्तुत्थंटंकणसंयुतं
समदितंक्षौद्रेणवासंयुतं॥निर्दोषंविषतिंडुकांतुषजलेक्षिप्त्वाविपत्वंविषंतैरप्याथविभीतकनि
हितंकुष्टकंटंकणं॥कासीसंटंकणंशंखंवरदागैरिकंपृथक्॥नीलांजनंधनंपर्षछुद्धंस्याज्जंभनीः
रसं॥ २ ॥विद्रुमंमौक्तिकंशुक्तिसौराष्ट्रंचभुजंगमः॥इत्याद्यन्निनधौतंस्याछुद्धंचोपरसादिकं॥जेपा
लेनिसुषंकृत्वाकुंभेदोलायुतंपचेत्॥अंतर्जिह्वांपरित्यक्त्वायुंजाद्वरसकर्मणि॥ ४ ॥इतिजेपालशु
द्धिः॥ ॥अथस्वर्णादिधातुमारणशोधनं॥स्वर्णात्तारौत्तमनागौवंगौकांतंवनीक्षणकं॥मुरणांतमष्ट
धालोहंकांस्यात्वंचकंत्रिधा॥तैलेतक्रेगवांमूत्रेकांजिकेवकुलित्थके॥सप्तधातप्तनिर्वाणात्सर्वधातू

पशुक्रांति॥ इति शोधनं॥ स्वर्णपत्रं समं नागभस्मभिर्विलेपितं॥ त्रिवारं वा गजपुटे सुवर्णभस्मतां व्रजे
त्॥ इति सुवर्णमारणं॥ ॥माक्षिकं दरदं निर्वृतं सूक्ष्मरूप्यदलं संचयं पुटेत्॥ द्विवारम
थ भस्मतां व्रजेत् पात्रकौघ्रवशंकरस्मृतं॥ इति रौप्यमारणं॥ ताम्रं द्विगुणपत्रलिनाहृताश्च मूषि
कमध्ये निपुटेद्गजैर्वा॥ देयं ततः स्रोगशितं वताम्रशुद्धस्य षडसकमेयोगे॥ इति ताम्रमारणं॥ घो
षालेवर्तुलं ताम्रं सत्वं हन्याच्च ताम्रकं॥ सत्वं वरसकादीनां निहन्याताश्रवत्सदा॥ ५ ॥ताम्रव
त् घोषमारणं वशोधयेन्नास्येन भिषक्॥ इति कांस्यपित्तलमारणं॥ मनःशिला गंधयुता तभूष
णोयमुत्तं नागदरविमृष्टं॥ त्रिभिः पुटैः कुंभिसितैः प्रयाति भस्मत्वमेतत् स्रवदंतितज्ज्ञाः॥ इति नागमा

रणं॥ वंगः सार्कपयस्तारलेपैश्शुष्कपुटैस्त्रिभिः॥ म्रीयते भस्मकेव्रह्म कासुघर्षसायोगतः॥ इति वंगमार
णं॥ पलाशद्रवयुक्तेन वंगपत्रं विलेपयेत्॥ तालेमपुटितं भस्म त्रिवारं जायते ध्रुवं॥ ७ ॥इति वंग
मारणं॥ कांतं तिक्ष्णं च मुखं च पत्रीकृत्य प्रयत्नतः॥ त्रिफलाकल्कतोयानां सरसानि वापि सेपुनः॥ याव
द्भीयेति पत्राणि कुर्योन्नावदतंद्रितः॥ त्रिफलाकल्कसंमिश्रैः शरावांस्त्रीश्च वा पुटेत्॥ लोहं वा रितरं
तेन जायते सर्वरोगजित्॥ इति लोहमारणं॥ ॥सूक्ष्मचूर्णमयः किट्टं तापितं वर्यरोस्थितं॥ नि
र्वापितं तु गोमूत्रे शुद्धं स्यात्त्रिफलापुटैः॥ संप्रानियोजयेद्वेशो मंदूरं रोगनाशनं॥ इति द्वितयमात्र
स्य भागं धृत्वाथ कांतिके॥ क्षिप्त्वा संक्षेपयेत् वध्वा सुधार्यं दृढकर्पटे॥ करभ्यां मर्दयेत्पात्रे धान्याभ्र

कंरविःक्षीरैःरविमूलद्रवेणवा॥पिष्ट्वापिष्ट्वापुटेपाकात्सप्तधाग्रीयतेभ्रकः॥ ४ ॥कृष्णाभ्रंदहनेविशु
द्धाति भृशंतत्कांजिकेतापितंशुष्कंवारविवारणाघनतरंपीत्वादिनांतेपुटेत्॥काश्यग्रस्वरसेनवाथ
वरयासूत्रेणाभावंपुनर्निश्चंदोषिमृतंभवेल्लघुतरैःक्षीरणपुटैःपंचभिः॥इत्यभ्रकमारणं॥यतमा
त्रंरसंशुद्धंमात्रंतुगंधकं॥विधिवत्कज्जलिंकृत्वान्यग्रोधांकुरवारिणा॥भावनात्रितयंदत्वास्था
लीमध्येनिधापयेत्॥निधायकढ्यीयंत्रेवालुकाभिःप्रपूरयेत्॥दग्धांतंदनुमंदाग्निभिरणामवतु
ष्टयं॥जायतेरससिंदूरंतरुणारुणसन्निभं॥ ३ ॥इतिरससिंदूरः॥रसगंधकयोःकृत्वाकज्जलीं
समभागयोः॥नवसागरकंदत्वाकिंचिज्जंबीरवारिणा॥विमर्द्यत्रिदिनंयत्नात्कांजिकेनपुनःपुम

गुरुः
१६

कर्यतद्वत्तायांतुकावक्त्र्यांविनिक्षिपेत्॥संरोध्यवालुकायंत्रेसप्तिद्वेत्रिदिनंपचेत्॥समुद्धरेन्नालक
स्थंभसंदग्धोयसन्निभं॥इतिरससिंदूरः॥ ॥इतिशोधनमारणाधिकारः॥अथोयथोगिकानांगु
णागुणाश्च॥सूतोशुद्धनयागुणंनकुरुतेकुष्ठाग्निमांद्यक्रमिक्षयोरोगकजाग्रदारमरणंधत्तेनरणां
सिवरणात्॥शुद्धःस्यात्सकलामयैकशमनोदृक्पुष्टिकांतिप्रदोदृष्योमत्रविनाशनोबलकरःकां
ताजनानंदनः॥रसगुणाअगुणाश्च॥तापस्योत्संगसंकोचकफमारुतमेहकृत्॥अशुद्धस्तार
कःशुद्धोमूत्रकारोगहामतं॥इतितारगुणाः॥यानरोगान्हंतिरोहांसिसंशुद्धानिमृतानिव॥तानि
वकुर्वतेशुद्धान्यमृतानिगुरूणिव॥इतिलोहगुणाः॥आयुर्बलंक्षीप्रभाधीस्मृतिकरमखिलव्याधि

विश्वंसपुरायंभूयावेशप्रशांतिसमरत्नसुखदंसौख्यपुष्टिप्रकाशि॥ गांगेयंवाथरोयंगदहरमजराकारि
मेहायहारिक्षीणानांपुष्टिकारिस्फुटमतिकरणाकारणांवीर्यवृद्ध॥ १ ॥इतिगुवर्णरौप्यगुणा
:॥ गुल्मयाराणुपरिणामशूलजिह्वेवनेकृमिहरंविशोधनं॥ श्रीहजठरंव्रणायहृच्छ्वेष्मवातज्वर
हृत्प्रविनाशं॥ इतितामगुणाः॥ वंगोदाहहरःयाणुत्रंतुविनाशकः॥ तद्धनागोपिडुनामवात
हृत्किंविडुहृत्कृत्॥ ॥इतिनामवंगगुणाः॥ लोहजंतुविकारपांडुपवनक्षीणात्वपित्ता
मयस्थौल्यार्शोग्रहणीज्वरानिलकफजिच्छोफप्रमेहप्ररोहन॥ गुल्मश्रीहविषायहंवरकलंकु
ष्ठाग्निमाद्यप्रणुत्सौख्यालंविरसायनंमतिहरंकांतादिकंकीदृवत्॥ इतिलोहगुणाः॥ अथ

द्रमायुर्गगनंनिहन्यात्कफानिलोत्थानकरंतथैव॥ सवंडिकंतंतुकरंतदन्नंछैदागमंदानरदंनृणांस्यात्॥ इत्यभ्रकगुणाः॥ गौरीतिजःपरममृतंवातपित्तक्षयघ्नंप्रज्ञावोधिप्रशमितज्वरंवृष्यमायुष्यमग्र्यं॥ वल्यस्निग्धंरुचिदमकफंदीपनंशीतवीर्यंतत्तद्रोगैःसकलगदहृद्गोमसूत्रेद्रवंधि॥ अश्रुद्रुगंधोभ्रमजाग्रकुष्ठदाहार्तिशोषंकुरुतेथश्रुद्रः॥ विशेषतोमृत्युहरोग्निकर्तारसायनःकुष्ठहरोरुजायहृत्॥ इतिगंधकगुणाः॥ ॥इतिविकित्सासारेरसशोधनमारणाधिकारःसमाप्तः॥ ॥अथ ज्वरादीनांनिदानचिकित्सामाह॥ ॥दक्षाप्रमावसंकुद्धरुद्रनिश्वाससंभवः॥ ज्वरोःमूधाप्रथकद्वंद्वसंघातागंतुकस्मृतः॥ मिथ्याहारवि

वि.
१६

हाराभ्यां दोषाद्यामाशयाश्रया॥ वर्हिनिरीक्षकोष्ठाग्नीज्वरदाध्युरसानुगाः॥ सर्वेषामेव रोगाणां नि
दानं कुपिता मलाः॥ अत्यांबुपानाद्दिवसाच्च दिवाशयाज्जागरणाच्च रात्रौ॥ संधारणान्मूत्रपु
रीषयोश्च षड्भिः प्रकारैः प्रभवंति रोगाः॥ ३ ॥ अथ वातज्वरलक्षणाय वारः॥ देहं कंटकितः स
वारिनयनं हृत्कंठरावेषणं कंडूस्तश्वसनं च शोषवमनं मूत्रं सुवर्णप्रभं॥ शैथिल्यं कटिशोथनं
स्थिरतनुः कुक्षौ च वातग्रहः स्याज्जौल्यं मुखमन्त्रपिच्छति गुणैरेभिश्च वातज्वरः॥ ५ ॥ नवज्वरे
दिवास्वप्नस्नानाभ्यंगानमैथुनं॥ क्रोधप्रवीतव्यायामकषायांश्च विवर्जयेत्॥ सठीपुष्करमूलं
च भार्ङ्गीं दुरालभा॥ गुडूचीनागरं पाठा किराटकदुरोहिणी॥ एकशथ्यादिकः क्वाथः सर्ववातः

गुरुः
१६

श्रृंगी

ज्वरापहः॥ वाशादिषु वशोकेषु दद्यात्सोपद्रवेषु च॥ इति शथ्यादि॥ किराताद्यामलोदीच्यन्नहृतीद्वयक्षो
क्षरैः॥ सच्छिराकलशीविश्वैः क्वाथो वातज्वरापहः॥ इति किरातादिः॥ पिप्पलीसारिवाडाक्षाशतपु
ष्पाहरेणुभिः॥ कृतः कषायः सगुडो हन्यान्मारुतजज्वरं॥ इति पिप्पल्यादिः॥ त्रिफलाद्योषधसगुडः
शर्करात्रिवृताद्रवं॥ मोदकं भक्षयित्वा तु पिबेद्योष्णोदकं पुनः॥ पार्श्वशूलेरुचौ कासे ज्वरे वानिल
संभवे॥ इति त्रिफलाद्यो मोदकः॥ अथ पित्तज्वरः॥ ॥ पित्ते संभ्रमतामुखैकदुकता श्वासोष्णता
रक्तता मूत्रे तीव्रशिरोर्तिवांगदहनं पार्श्वे च बाधा रति॥ शोषः पक्षणतिनिरपीततिभिरे रक्तेक्षणेत्रे
भ्रमिः कोपो रोदनविस्मयो विलपनैः पित्तज्वरं रक्षयेत्॥ द्राक्षाभयापर्पटकामृतिकाक्वाथं सशर्करं

ष्णाकफलेविदध्यात्॥ प्रलापमूर्छाभ्रमदाहशोषतृष्णान्विते पित्तभवेज्वरेच॥ द्राक्षादिः॥ रक्ताश्वमार
पुष्पाणि॥ धात्रीधान्यंवचामयं॥ पिष्ट्वाकोष्णजलेकार्यो लेपोमूर्छिज्वरापहः॥ दुरालभायर्यष्टकप्रियंगुः
भूनिंबवासाकटुरोहिणीनां॥ क्वाथंपिबेद्धकैरयावगाढतृष्णान्वितपित्तजज्वरदाहयुक्तः॥ १ ॥दुरा
लभादिः॥ एकएवखलुपैत्तिकज्वरंहंतिपर्यटकृतःकषायकः॥ चंदनोदकमहौषधान्विश्चैत्तदाः
किमुपरंविचारणा॥ ४ ॥पर्पटादिः॥ विदारिदाडिमरोध्रंदधित्थंबीजपूरकं॥ एभिःप्रदिह्यान्मू
र्छानंतरंदाहात्तस्यदेहिनः॥ केसरंमातुलुंगस्यमधुसैंधवसंयुतं॥ जिह्वातालुगलक्लोमशोषेमूर्छनि
दापयेत्॥ ५ ॥उडुंबरत्रिफलाद्विन्नात्तज्जलेसितयायुतं॥ पीतंपित्तज्वरंहंतिपटोल्यावासिका

गुरुः
१९

जलं॥ ६ ॥अथश्लेष्मज्वरः॥ नेत्रेवारिगलग्रहयुतेश्वासोमुखेक्षारतापादौदाहयुतौकरौचवडुलंमू
र्ध्निशिरोरोधनं॥ शोषःसर्वशरीरसंधिषुमहान्नासाववाधारतिःस्वल्पस्वेदमिदंकलेवरमहोसोयंक
फास्वोज्वरः॥ १ ॥पिप्पलीपिप्पलामूलंचव्यंचित्रकनागरैः॥ मरिचैलाजमोदेंद्रयाठारिष्टकजी
रकं॥ २ ॥भार्ङ्गीमहानिंबफलंहिंगुरोहिणिसर्षपं॥ विडंगानिविषामूर्वागणोयंकफनाशकः॥ पि
प्पलीपिप्पलीमूलंचव्यंचित्रकनागरैः॥ पंचकोरमिदंप्रोक्तंरोधनंकफनाशनं॥ ४ ॥पंचकोला
दिः॥ कटुकीपिप्पलीमूलंमुस्ताचैवहरीटकी॥ शिरःशूलमपहाथःसर्वज्वरविनाशनः॥ ॥
इतिवाडुपंचमूलं॥ पठोलत्रिफलातिक्ताशठीवासामृताभवः॥ क्वाथोमधुयुतःपीतोहन्यात्कफकृ

चि.
२०

नंज्वरं॥ यष्टीलादिः॥ निदग्धिकाछिन्नरुहोयकुल्याविश्वौषधैः साधितमंबुपीतं॥ हंतिज्वरश्वासबला
सकाशशूलाग्निमांद्यंमठरानिलंच॥ निदग्धिकादिः॥ भूनिंबनिंबपिप्पल्यः शठीशुंठीशतावली
गुडूचीबृहतीवेतिक्वाथोहन्यात्क्षयज्वरं॥ भूनिंबादिः॥ ॥अथवातपित्तज्वरलक्षणोपचारः
॥ हृत्कंठेदहनंशिरोर्तिवमनंकुक्षौववातग्रहः॥ श्वासोदाहविमोचनंतडरुविर्दाहः सदानेत्र
योः॥ कंडूस्वेदमतीवविस्मयकरंकृष्णामांस्यंसमास्यंसदामूत्रंश्यामलधूम्रवर्णमथवावा
तिसपित्तज्वरे॥ १ ॥ गुडूचीपर्पटोमुस्ताकिरातेविश्वभेषजं॥ वातपित्तज्वरेदेयंपेवभद्रमिदंशुभं
॥ इतिपंचभद्रः॥ द्राक्षाकिरातामृतकामलासठीक्वाथंपिबेत्पित्तमरुज्वरंजयेत्॥ छिन्नाकिरातात्

गुरुः
२०

सविश्वपर्पटाः सवातपित्तज्वरहृन्नियोजितः॥ ॥अथवातश्लेष्मज्वरलक्षणोपचारः॥ ॥स्निग्धंश्वा
सगुरुंशिरोव्यथनेसर्वांगपीडाभवन्नेत्रेवारियुतेकरोतिवमनंरोमांतिवाश्लेष्मणा॥ दीर्घंनिःश्वसं
तेतथार्तिदहनंवानिद्रयेवाकुलंमूत्रंफेनिलयल्लवंविगदितंवातज्वरश्लेष्मणि॥ १ ॥
मुस्तापर्पटकंशुंठिगुडूचीसदुरालभा॥ कफवातारुचिछर्दिदाहशोषज्वरापहः॥ २ ॥ आरग्वधे
ग्रंथिकमुस्तत्रिफलाहरीतकीभिः कथितः कषायः॥ सामेसशूलेकफवातयुक्तेज्वरेहितोदीपन
पाचनश्च॥ ३ ॥ आरग्वधादिः॥ क्षुद्रामृतानागरपुष्करादुयैः कृतः कषायः कफमारुतोत्थे॥
सश्वासकासारुचिपार्श्वशूलेज्वरेत्रिदोषप्रभवेपिशस्यते॥ क्षुद्रादिः॥ अथपित्तश्लेष्मज्वरः॥

चि॰
२१

नेत्रे यदा पतिमिरयीतनिमिरे रामणांतथोद्धर्षणं कोयारोवकविस्मयोनवरतिर्वक्रे कटुक्षारता॥ यादौ
दाहयुतौतदागलगृहाद्धुविड्वांतिः सदामूत्रे कुंकुमयांदुरेभिसगयंपित्तेकफाद्धोज्वरं॥ कंठकार्यमता
भीनागरेंद्रयवासकं॥ भूनिंबवंदनंमुस्तायष्टीलंकटुरोहिणी॥ २ ॥कषायंयावयेदेतत्पित्तश्लेष्म
ज्वरापहं॥ दाहःतृष्णारुचिर्हिक्काकासहृत्पार्श्वशूलहृत्॥ ३ ॥यष्टीलंवंदनंपूर्वोक्तिक्वाथाममृता
कल्कः॥ पित्तश्लेष्मारुचिछर्दिज्वरकंडूविषापहः॥ यष्टीलाधि॥ ॥अमृतारिष्टकटुकामुस्तेंद्रयवना
गरैः॥ यष्टीलवंदनाभ्यांवपिप्पलीचूर्णसंयुतः॥ अमृतारिष्टकमेतत्पित्तश्लेष्मज्वरापहः॥ छर्दि
वकहृल्लासदाहतृष्णानिवारणः॥ अमृतारिष्टकः॥ तिक्तोशीरवलाधान्यपर्पटांभोधरैःकृतःक्वा

गुरुः
२१

थःपुनःसमायातंज्वरंशीघ्रंनिवारयेत्॥ इतिनिक्वादि॥ जीरकंकारवल्लंवुशीतंपूर्वज्वरेहितं॥ ॥अ
थसन्निपातज्वरलक्षणोपचारः॥ ॥कासश्वासप्रमेहंप्रलपनवलनंकर्णयुग्मंसनादंनिद्रानाशोतिह
ल्लासगुरुतरमुदरंशीर्षसंधास्थिपीडा॥ दाहःशीतंक्षणोनाप्रततगलविरुक्लोचनेचातिरक्तेनिर्भुग्ने
रक्तपित्तेप्रलपनमुदितंलक्षणंसन्निपाते॥ १ ॥क्षणेदाहःक्षणेशीतमस्थिसंधिशिरोरुजः॥ स
हसावेकलुपेरक्तेनिर्भुग्नेचापिलोचने॥ सस्वेदोसरुजौकर्णौकंठभूकैरिवावृतः॥ तंद्रामोहःप्रलापश्च
कासश्वासारुचिभ्रमः॥ पीरदग्धखरस्पर्शत्रिदोषान्तस्तांगतापरं॥ ष्ठीवनंरक्तपित्तस्यकफेनोन्मिश्रितस्यच
॥ शिरसोलोष्ठनंतृष्णानिद्रानाशोहृदिव्यथा॥ स्वेदमूत्रपुरीषाणांविरदर्शनमल्पशः॥ कृशत्वंनाति

गात्राणांश्रवणांकंठकूजनं॥कोष्ठांशयावरक्तानांमंडलानांवदर्शनं॥मूकत्वंस्रोतसांयाकोगुरुत्व
मूदरस्यच॥विंशत्याकश्चदोषाणांसन्निपातज्वराकृती॥ ८ ॥दोषेविवृद्धेनष्टेग्नौसर्वसंपूर्णलक्ष
णाः॥सन्निपातज्वरोसाध्यःकृच्छ्रसाध्यस्तनोन्यथा॥सन्निपातज्वरस्यांतेकर्णसदारुणाः॥शो
फःसंजायतेतेनकश्चिदेवविमुच्यते॥ ९ ॥पित्तकफानिलवृद्धादशदिवसद्वादशसप्ताहान्
॥हंतिविमुंचतिपुरुषंत्रिदोषजोधातुमलकायात्॥ १० ॥सप्तमेदिवसेप्राप्तेदशमेद्वादशेथि
वा॥पुनर्योरुतरोभूत्वाप्रशमंयातिहंतिवा॥ ११ ॥सप्तमीद्विगुणायावन्नवन्येकादशीतथा
एषात्रिदोषमर्यादामोक्षायववधायव॥ १२ ॥सन्निपातज्वरेपूर्वंकुर्यादामकफापहं॥यश्चा

गुरुः
२२

नश्नेमाशासंक्षीरोशमयेत्पित्तमारुतौ॥ १३ ॥लंघनंवालुकास्वेदोनस्यनिष्ठीवनंतथा॥अवलेहोंज
नंचैवप्राक्प्रयोज्यंत्रिदोषजे॥ १४ ॥त्रिरात्रंपंचरात्रंवादशरात्रमथापिवा॥लंघनंसन्निपातेतुकुर्यादारो
गदर्शनात्॥ १५ ॥दोषाणामेवसाशक्तिर्लंघनेथसहिष्णुता॥कश्चिद्दोषविमुक्तोनलंघनंसहतेनरः
॥ १६ ॥ज्वरेलंघनमेवादौउपदिष्टमृतेज्वरात्॥क्षयानिलभयक्रोधकामशोकभ्रमोद्भवात्॥ १७
॥आमाशयस्थोहत्वाग्निंसद्योमार्गान्विधीयव॥विदधातिज्वरंदोषस्तस्मात्कुर्वीतलंघनं॥ १८ ॥
प्राणाविरोधेनाचैनंलंघनंनोपवासयेत्॥वराधिष्ठानमारोग्यंपदार्थोयंक्रियाक्रमात्॥ १९ ॥न
चमरुतक्षुत्तृष्णामुखशोषभ्रमान्विते॥कार्यंबालेनवृद्धेनानगर्भिणीनदुर्बले॥ २० ॥मृदुर्ज्वरे

वि.
२३

लघुर्देहश्चलिनायदामलाः॥ पक्वंदोषंविजानीयाज्ज्वरेदेयंतदौषधं॥ २१ ॥उष्णाधिक्याद्दृतेनास्तिज्वरे
नास्तुक्षयाविनातस्मात्पित्तेविरुद्धानित्यंतेत्पित्ताधिकेःधिकं॥ २२ ॥अथलंघनगुणाः॥नवज्वरे
॥आदावामविनाशायद्वितीयेपित्तनाशनं॥तृतीयेकफनाशश्चचतुर्थेवातनाशनं॥नवमेसर्वदोष
मूलंलंघनंकथ्यतेबुधैः॥ ॥अथचिकित्सा॥मातुलुंगार्द्रकरसंकोष्णंत्रिलवनान्वितं॥नस्याद्या
सिद्धविहितंनश्यंतीक्ष्णंप्रयोजयेत्॥ १ ॥मधूकसारसिंधूत्थवचोषणाःसमाः॥तीक्ष्णंपिष्ट्वांभस
नस्यंकुर्यात्संज्ञाप्रबोधनं॥शिरीषबीजगोमूत्रकृष्णामरिचसैंधवैः॥अंजनंस्यान्नबोधायसरसोन
शिरायवैः॥कदूफलंपुष्कलंशृंगीकृष्णावमधुनासह॥कासश्वासज्वरहरःश्रेष्ठोलेहःकफांतकः॥

गुरुः
२३

४ ॥भूनिंबदारुदशमूलमहौषधाद्यैस्तिक्तेंद्रवीजधनिकेंभकणाकषायः॥तंद्राप्रलापकसरुविदाहमो
हश्वासादियुक्तमखिलज्वरमाशुहंति॥ ५ ॥भार्गीभूनिंबैर्धनीकटुकवचाख्योषवासाविशालारास्ना
नंतायष्टीसुरतरुरजनीपाटलाष्ठिंडुकाभिः॥ब्राह्मीदार्वीगुडूचीत्रिवृतमतिविषापुष्करत्रायमाणै
र्व्याघ्रीसिंहीकलिंगैस्त्रिफलसहितयुतैः कल्पितैस्तुल्यभागैः॥ ६ ॥क्वाथोद्वात्रिंशनामात्रिभिरधिक
दशाहान्संनिपाताद्विहंतिशूलंकासादिहिक्काश्वसनगुदरुजाध्मानविध्वंसकारी॥उरुस्तंभात्रवृद्धि
र्गतगदमरुचिःसर्वसंधिग्रहार्तिर्मांतमोग्रंनिहन्यान्नगरिपुरिववेद्रोगजालंतथैव॥ ७ ॥स्विदो
ऽमेभूरुकुलत्थचूर्णानियातनशस्तमितिब्रवंति॥मत्युश्चतस्मिन्वरुधिछलत्वाद्धीनस्यजंतोःपुरतः

चि॰
२४

सरत्वात्॥ दार्व्यंबुदातिक्तफलत्रिकंचक्षुद्राघटोलीरजनीसनिंब॥ क्वाथंविदध्याज्वरसन्निपाते निश्चेतने पुंसि
विबोधनार्थं॥ लशुनंतिक्तकंकांडं भार्गीवातिविषातथा॥ नरमूत्रेण वक्वाथः सन्निपाते सुदारुणे॥ लशु
नादिः॥ विषमागोभवेदेकोमरिचस्त्रिगुणः स्मृतः॥ अरणोपंजलंभस्म षोडशांशसमन्वितं॥ एकत्रि
मीलितं चूर्णं घृतेस्वरसभावितं॥ आनयेशोषितं तच्च शीतं स्वदहरेपरं॥ अथवा वरणाकाभ्रक्षयवानी
चूर्णमिश्रिताः॥ वचोषणारजोयुक्ताः स्वेदसंशोधनाममताः॥ उष्णिखोस्मृतितो जिह्वो द्राक्षयामधुपि
प्पलया॥ प्रलेपयेत्सघृतया सन्निपातभवेज्वरे॥ सनागरंदेवदारुसाल्वाविश्वकयेषितं॥ प्रलेपनमिदं श्रे
ष्ठं गलशोफविनाशनं॥ नागरादिलेपनं॥ कुलित्थंकटुफलं शुंठीकालवल्लीसमांशः [illegible] कैः॥ मुः

मुरुः
२४

खोष्णलेपनं कार्यकरीमूलेमुरुर्मुरुः॥ कुलित्थादिलेपः॥ इंगुदीनिशाविशालासैंधवसुरसारुरविदुग्धैः॥
दनः क्रमेणालेपो हरति महाकर्णिकग्रंथिं॥ ॥इंगुद्यादिलेपनं॥ किरातकटुकायथाकरणाकायफ
लंवा॥ उद्धूलनंत्रिदोषेवसदाशैत्येवशस्यते॥ उद्धूलनं॥ कस्तूरीमरिचंवाजिलालावमधुनांजन॥
तंद्रीनिवारयत्याशुघोषप्रधमनात्तथा॥ ॥अंजने॥ तुरंगलालासहितामनःशिलानिहंतितंद्रीष
कृदंजनेन॥ वर्वूलयत्रारिहरीतकीचसंस्वेदितास्वेदविकारहंत्री॥ अंजनोद्धूलने॥ विल्वाग्निमंथ
स्योनाककाश्मरीपाटलातथा॥ शालियर्णीपृष्टिपर्णीबृहती द्वयगोक्षुरैः॥ उभयंदशमूलंस्यात्सन्नि
पातरुगाष्ठ॥ इतिदशमूलं॥ ॥आर्द्रकस्वरसोपेतंसैंधवंशकटुत्रयं॥ आकंठंधारयेच्चास्यनिष्ठी

वेद्यपुनः पुनः॥ तेनास्य हृदयाच्छ्वासामन्यपार्श्वशिरोगलात्॥ लीनोव्याकृष्यतेभुष्कोलाघवंचास्यजायते॥
सघस्त्रियंवसप्ताहाद्दशाहाद्वादशादपि॥ एकविंशाद्दिनैः शुद्धः सन्नियातीसुजीवति॥ अन्नस्निग्धोहृतो
तीक्ष्णैः कटुमधुरसुरातायसेवाकषायैः स्वादुक्षोधातिरूक्षैर्गुरुतरयिशिताहारसौहित्यशीतैः॥ शो
कक्षायमचिंताग्रहगरावनितात्यंतसंगप्रसंगैः प्रायः कुप्यंतिपुंसांमधुसमयशरद्वर्षरोसंन्नियाताः॥
अथाभिघातज्वरः॥ ॥ अभिचाराभिघाताभ्यांमभिष्वंगाभिशापतिः॥ आगंतुजायतेदोषैर्यथास्व
तंविभावयेत्॥ अभिचाराभिघाताभ्यांमभिष्वंगाभिशापतः॥ आगंतुर्जायतेदोषैर्यथास्वंतंविभाव
येत्॥ अभिचाराभिशापाभ्यांमोहतृष्णावजायते॥ अभिचाराभिशापोत्थौजसोहोमादिनाजयेत्॥

दाहिस्वस्त्ययनातीर्थैरुत्पातग्रहपीडनैः॥ ४ ॥ भूतविद्यासमुद्दिष्टैर्वंधावेशनताडनैः॥ जयेद्भूताभि
षंगोत्थमनुयातंचमानवं॥ मधूकसारंमरिचंसैंधवंपिप्पलीवचा॥ संज्ञाप्रबोधनंनस्यंदेयंभूतज्वरे
सदा॥ ६ ॥ निरग्निकानागरकामृतानांक्वाथंपिबन्निश्रितपिप्पलीकम्॥ जीर्णज्वरेवकका
शश्लश्वासाग्निमांद्यार्दितपीनसेषु॥ ७ ॥ धातुमन्यतमंप्राप्यकरोतिविषमज्वरं॥ शीतपू
र्वैःसविज्ञेयोदाहपूर्वोनिरंतरः॥ ७ ॥ एकंद्वित्रिचतुर्थस्याद्विषमोन्यस्तुजीर्णकः॥ एतेपंचज्व
राःपीडयंत्येवंचक्रवासरं॥ ८ ॥ यःस्यादप्रियतात्कालान्शीतोष्णाभ्यांतथैवच॥ वेगतश्चापिविष
मःस्मृतः॥ ९ ॥ मुस्तामलकगुडूचीविश्वाचीविश्वाचकंटकालिकांक्वाथः॥ पीतःसकणाचूर्णा

मधुभ्यांविषमज्वरंहंति॥ १० ॥महौषधामृतामुस्तावंदनोशीलधान्यकैः॥क्वाथस्तृतीयंहंतिश
र्करामधुयोजितः॥ ११ ॥वासाधात्रीस्थिरायारुधान्यांगरसाधितं॥सितामधुयुतंकुर्याच्चातुर्थिक
निवारणं॥ १२ ॥कन्याकर्तितसूत्रेणाश्रयामार्गस्यमूलिका॥रवौबद्धाज्वरंहंतिस्तृतीयकच
तुर्थकं॥ १३ ॥काकजंघावलाश्रणमाभृंगराजोपमार्गकः॥सकैकसुधायोगेनबध्वाचातुर्थि
कंहरेत्॥ १४ ॥कृष्णावरदृढोबद्धोगुग्गुलूकपुष्पजः॥धूपश्चातुर्थकंहन्यान्नमुःसूर्यरवो
दितः॥ १५ ॥कोशातकीधात्रथाजीरीसप्तायाहलहानितः॥अंतकालेचमर्त्यानांजायतेदा
रुणाज्वरा॥ १६ ॥सर्वज्वरायहानीलीमूलंरात्रिज्वरापहं॥दुग्धिकामूलिकरीहंतिवेलाज्व

रंतथा॥ १७ ॥आतंकमुक्तेक्लशनाश्रयाणांविमुक्तपथ्यासुवितंक्रियाणां॥अल्पोविदोषोविषमंविदध्याज्ज्व
रंविवृद्धंप्रतियक्षरुद्धं॥ १८ ॥यष्ठीलयक्षीमधुनिक्तरोहिणीयनाभयाभिर्विषमज्वरघ्नः॥क्लृप्तःकषायस्त्रिफ
लामृताद्यैष्टथग्वाविषमज्वरघ्नः॥ २० ॥यष्ठीलीयंवकं॥पथ्यास्थिरानागरदेवदारुधात्रीद्वयैरुत्क
थितःकषायः॥सितोपलामाक्षिकसंप्रयुक्तश्चातुर्थिकंहंत्यविरेणपीतः॥ २१ ॥इतिपथ्यादिः॥त्रिभिरथ
परिवृद्धंपंचभिसप्तभिर्वादशभिरथविवृद्धंपिप्पलीवर्द्धमाना॥अनुपिबतियथोयस्तस्यनश्वासकास
ज्वरजठरगुदार्शोवातरक्ताक्षयास्युः॥ १ ॥क्षीरेणपिप्पलीपंचक्षीरान्नंभुज्यतेतुयः॥दशाहंपंचवृद्धिः
स्यादपकर्षस्तथैवच॥ २ ॥इतिपिप्पलीवर्द्धमानं॥ज्वरेजनंनिशातैलक्लृप्तामरिचसैंधवैः॥वयाहरीतकी

सर्षिर्धूपः स्याद्विषमज्वर॥ १ ॥अंजनधूपो॥अजायाश्चर्मरामाणि वचाकुष्ठं पलंकषा॥निंबपत्राणि मधुच
धूपनंज्वरनाशनं॥ २ ॥धूपनं॥पलंकषानिंबपत्रवचाकुष्ठहरीतकी॥सर्षपाः सप्तवाः सर्षिर्धूपनेज्व
रनाशनं॥ ॥इति अष्टांगधूपः॥सर्पत्वचा सर्षपहिंगुनिंबपत्राण्यमीषां सचूर्णा धूपः॥विनिग्रहेण
क्षेसडाकिनीनांकरोति रक्षांविषमज्वरस्य॥धूपः॥कुमारीमूलसर्षपैकंपीत्वाकौलजलेवमेत्॥विष
मंतुज्वरंहंतिवमनेनविरंतनं॥ २ ॥हसोनकल्कंतैलेनसर्षिषावातिलैरपि॥सेवितंविषमंहंतिवा
तश्लेष्मगदानपि॥ ॥अथसुदर्शनचूर्णं॥ ॥त्रिफलारजनीयुग्मंकंठकारीयुगंशठी॥त्रिकटुत्री
थिकंमूर्वागुडूचीधन्वयासकः॥वदुकापर्पटोमुस्ताचायमाणवचालकं॥निंबपुष्करमूलंचमधुयष्टीचव

सकः॥यवानीद्वयवंभार्गीशिवावीजंसुराह्वजाः॥वचाचक्रपत्रकोशीरवंदनातिविषाबला॥शालपर्णीपृष्ठपर्णी
विडंगंतगरंतथा॥चित्रकंदेवकाष्ठंवचवंडाक्षापटोलजं॥ ६ ॥जीवकर्षभकौवैवलवंगंवंशलोचनं॥पुंडरीकंव
काकोलीयत्रजंजातियत्रकं॥तालीसपत्रंवतथासमभागानिचूर्णयेत्॥सुर्वचूर्णास्यवार्द्धांशंकैरातंप्रक्षिपेत्सुधीः
एतत्सुदर्शनंनामचूर्णंदोषत्रयापहं॥ज्वरांश्चतिविलान्हंतिनात्रकार्याविचारणा॥ ९ ॥पृथक्द्वंद्वागंतुकांश्च
धातुस्थानविषमरान्सन्निपातज्वरांश्चापिमानसानपिनाशयेत्॥ १० ॥शीतज्वरैकाहिकादीन्मोहतंद्रांभ्र
मंतथा॥श्वासकासौवपांडूंश्चहृद्रोगंहंतिकामलां॥ ११ ॥त्रिकपृष्ठकटीजानुपार्श्वशूलनिवारणं॥शीतांवू
नापिवेधीमान्सर्वज्वरनिवृत्तये॥ १२ ॥सुदर्शनंयथासारचक्रंयानवानांविनाशनं॥तद्वज्ज्वराणां

वि.
२६

सर्वेषामिदं चूर्णं विनाशनं॥ इति सुदर्शनं चूर्णं॥ ॥किरातितिक्तकं तिक्ता गुडूची वेतकी घनं॥ धन्वयासक
दुत्रीणि क्षुद्रसिंही महौषधं॥ पर्पटः पिप्पली मूलं पुष्करं मागधं सठी॥ सपटोलमिदं चूर्णं षोडशाख्यं प्रकीर्ति
तं॥ अरुचिज्वरान्मारघोरान्वातपित्तसमुत्थितान्॥ सन्निपातान्निहंत्याशु वरकोक्तं रसायनं॥ अजीर्णाज्वरेक
क्षीणे क्षीणास्यादमृतोयमं॥ तदेवतरुणे पीतं विषवद्धंति मानवं॥ अंतकाक्षाशिरःकंप्रः क्षवथुगात्रग
घवं॥ प्रस्वेदो मुखपाकश्च ज्वरमुक्तस्य लक्षणं॥ व्यायामं व्यवायं वस्त्रानं वक्रमणं तथा॥ ज्वरमुक्तान
सेव्यं तावन्मो बलवान्भवेत्॥ ॥अथ रसोपचारः॥ वंगं हिंगुलजं पालाशं दंत्यं तु मर्दयेत्॥ दि
नार्द्धेन ज्वरं हंति तमःसूर्योदयेतथा॥ ॥इति वालार्करसः॥ शुद्धं तं विषगंधं धूर्त्तबीजं त्रिभिः समं॥ चन्द्र

गुरु
२६

सू

रणं हिंगुणं व्योषं चूर्णं गुंजाद्वयं हितं॥ यक्तजं वीरडावैर्युक्तार्द्रस्यद्रवैर्युतं॥ महाज्वरांकुशो नाम ज्वराणां मंतको
भवेत्॥ एकाहिद्वाहिकं चात्र्याहिकं चचतुर्थकं॥ विषमं वात्रिदोषघ्नं नाशयेद्यामतः॥ इति महाज्वरांकुश
॥ सूतशुल्वत्रिवृत्तावलितिक्तादंतिवीजचपला विषतिंदुः॥ पथ्यासहविवृणैस्समांशं हेमवारिसहितं
नमकं॥ वल्लयुरमगुटिकार्द्रकवारान्नाशयेदभिनवज्वरमाशुः॥ विश्वतापहरणे त्रवपथ्यं मुद्गयूसहितं
लघुयूक्तं॥ इति त्रैलोक्यतापहरं॥ सूतगंधलोहकिट्टं विमर्द्य सर्वैस्तुल्यैर्वत्सनागं नियुंज्यात्॥ आर्द्रभृंगवी
जपूरंजयंत्यानिर्गुंडीकाभृंगराजद्रवैश्च॥ युक्त्या वैद्यो भावयित्वा विधेया सारार्द्धार्द्धं संनियात स्य मूलं॥ शीतै
र्वातैर्निर्मलं स्नानपानं पथ्यं दुग्धं शर्करा भिर्युतं च॥ ॥सन्निपातभैरवः॥ हिंगुलं च विषं व्योषं टंकणं मागधी

त्रिका॥ संचूर्ण्यैभावयेत्रेधामुरसार्द्रकहेमभिः॥ रसात्रिभुवनकीर्त्तिर्गुंजैकार्द्रद्रवेणवै॥ सर्वज्वरविनाशंवस
न्नियातांस्त्रयोदशः॥ २ ॥ इतित्रिभुवनकीर्त्तिः॥ रसंगंधंकंटंकणांवत्सनागंसमंमर्द्दयेद्भूर्त्तवीजैर्नयाम॥ त
तोवत्सनागेनहेमेनवीजैरसैर्भावयेत्त्रिवारंत्रिवारं॥ कत्र्यादित्र्यादिनापंचवारंततःस्यादयंसूतराजोमृत
प्राणदायी॥ ज्वरेसन्नियाते ज्वरेनूतनेवामहाश्लेष्मरोगेवयप्रमाणं॥ पयःपायसंयाधिकंतक्रमुक्तंसितावान
विसज्वरेचार्द्रनीरैः॥ ज्वरेचातिसारेघनंद्रावयुक्तेगदहरायशसाक्षौद्रसंसीतयावा॥ ज्वरेवायुनाग्निक्रि
द्वग्नियीतंप्रकंपेववाहूकजैकोगवाते॥ अयस्मारउन्मादवातान्निहंतियुक्तोसितैःपंचभिर्द्भूर्त्तवीजैः॥ ॥
इतिमृतिप्राणदायीसूतराजः॥ अथविषमेरसः॥ तालकर्वपरमूषकयुग्मंकांचनपत्रवजेरसघृष्टं॥

मर्दमर्दयपुनरपिमर्द्धशीतभयादिनवारणामुष्टिका॥ इतिशीतादिः॥ पिष्ट्वातालकमेकभागममलंशंखूकचूर्णाक्षि
पेदंत्याप्याथनवांशतोपिवशिखिग्रीवंपुःपेषयेत॥ कौमारीरसमर्द्दितोगजपुटेपाकंवशीतंततो गृह्णीयाद
थगुंजयाज्वरहरःखंडेनसंयोजयेत॥ एकंद्वित्रितयंचतुर्थकमिदंवेलाज्वरंनाशयेत्शीताश्चिथलाय
तेज्वरमिदंभानोयथाशार्वरी॥ इतिशीतारिः॥ तुथंटंकणातालकंवलिविषंस्यात्खर्पराख्यंसवैखल्व
तलेविमर्द्यमीतमान्तेकारवह्नीरसः॥ गुंजैकाप्रमितासशर्करयुतासोजीरकेणाथवाएकद्वित्रिचतुर्थे
ज्वरशीतहरणाः शीतांकुशोनामतः॥ इतिशीतांकुशः॥ चलदलतरुः॥ समुद्रस्यतरंगीरेद्विरदोनामवान
रः॥ तस्यसारणमात्रेणज्वरोयातिदिगंतरं॥ ॥ इतिज्वरोपचारः॥ ॥ अथातीसारलक्षणाद्याः

चि.
३०

:॥ ॥अनिलंफेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः॥शक्तादामं सरुक्शब्दं मारुतेनातिसार्यते॥पित्तात्पीतं हरितं लो
हितं वातश्लामूर्छादाहपाकोपपन्नं॥शुक्लं साङ्गं श्लेष्मणा श्लेष्मतुल्यं विश्रीतं हृल्लरोमामनुष्यः॥ २ ॥व
राहस्तेहमांसांबुसदृशं सर्वरूपिणां॥कृच्छ्रसाध्यमतीसारविद्यादोषत्रयोद्भवं॥आमक्रमं हित्वा नातिसा
रक्रियायतः॥अतः सर्वातिसारेषु ज्ञेयं पक्वामलक्षणं॥आमेषु लंघनं शस्तमादौ पाचनमेव च॥कार्यं वा
नशनं स्यात्तेसद्रवं लघुभोजनं॥लंघनमेकमुक्तानां नादस्तीभेषजं खलिनः॥समुदीर्णा दोषवयं शमयति तत्पा
चयेत्तेव॥ ७ ॥नागरातिविषामुस्तभूनिंबामृतवत्सकैः॥सर्वज्वरहः क्वाथः सर्वातीसारनाशनं॥ ॥ गुरुः
नागरादिज्वरातिसारे॥ ॥नागरं देवकाष्ठं वधान्यकं हरीतकी द्वयं॥दशात्पाचनकं पुर्वज्वरीतानोज्व ३०

रापहं॥ ॥धान्यपंचकं॥संवत्सकः सातिविषः सबिल्वः सोदीच्यमुस्तश्च कृतः कषाय॥सामेसमूले वसशो
णितेच विरेचयेत्तेपिहितोतिसारे॥वत्सकादिः॥स्नानाभ्यंगावगाहं वगुरुस्निग्धादि भोजनं॥व्यायामममग्निसं
तापमतिसारं विवर्जयेत्॥सदेवदारुः सविषः सपाठः सजंतुसंघनः सतीक्ष्णः॥सवत्सकः क्वाथं उदाहृतोसौः
शोफातिसारं बुधिकुंभजन्मा॥देवदार्वादिः॥विडंगातिविषानुस्तादारुपाठाकलिंगकं॥मरिचेन समायुक्तो शोथा
तीसारनाशनं॥ १ ॥विडंगादिः॥ननु संगृह्य रोगांश्चान्पूर्वमामातिसारिणां॥दोषाह्यादौ वर्द्धमानोजनयत्या
मयान्वदन्॥डंभजः स्थविरो वापि वातपित्तात्मकश्चयः॥क्षीणधातुबलार्तश्च वद्धदोषोतिचीश्रुतः॥आमो
पिसंभनिर्यस्याथावनात्सरणा भवेत्॥पिपासाश्वासमूर्छाविश्वंवदनोदीव्यवत्सकैः॥शोथातिसारशमनं विशेषा

वि.
३१

ज्वरनाशनं॥ विरातादिः॥ सल्लकीवदरीजंबुप्रियाल्वाम्रार्जुनत्वचः॥ पीताक्षीरेणमध्वाद्याः पृथक्तोशितनाशना॥ पुष्याकेनविपचेत्पक्वंदाडिमीफलं॥ तद्रसोमधुसंयुक्तः सर्वातीसारनाशनः॥ ३ ॥ चूर्णंकिंचिद्घृताभ्यक्तंशुंठ्याससरणुत्रैः॥ विष्टिजंपुष्याकेनविपचेन्मंदवह्निना॥ ततउद्धृत्यतच्चूर्णंग्राह्यंप्रातःसितासमं॥ आमशूलेविबंधघ्नंकुक्षिरोगविनाशनं॥ ४ ॥ पीत्वाशतावरीकल्कंपयसाक्षीरभुग्जयेत्॥ रक्तातीसारंपीत्वावातथासिद्धंघृतंनरः॥ गुददाहेप्रवाकेवापटोलमधुकांबुना॥ सेकादिकेप्रशंसंतिछागेनपयसाथवा॥ कल्कस्तिलानाकृष्णांनाशर्करांबुवभागिकः॥ आज्येनपयसापीतःसद्योनक्तंपयच्छति॥ मध्वेलिह्या कपित्थस्यसमंचौषक्षौद्रसर्करं॥ कटुफलंमधुयुक्तं॥ मुच्यतेनठरामयात्॥ कर्षोन्मितानुतांक्षीरिचानुजांतंत्रिः

गुरुः
३१

कार्षिकं॥ यवानीधान्यकाजी-ग्रथिवोषंपलांशकं॥ पलानिदाडिमादष्टौसितायाश्चैकभागिका॥ गुरोःकपित्थस्यकवच्चूर्णीयदाडिमाष्टकः॥ इतिदाडिमाष्टकं॥ ॥अथरसोपवारः॥ हिंगुलंवत्सनागंवटंकणंमरिचंकणा॥ मर्दयेद्दधिफेनेनरसोह्यानन्दभैरवः॥ गुंजैकंवाद्विगुंजंवांवलंज्ञात्वाप्रयोजयेत्॥ मधुनालेहयेवानुकुष्टजस्यत्वचाफलं॥ चुर्णितंकर्षमात्रंतुत्रिदोषोत्थातिसारनित्॥ इतिआनंदभैरवः॥ जातीफलंसैंधवहिंगुलवणराष्ट्रंठिविषहेमबीजं॥ सपिप्पलीकंगुटिकांवकुर्याद्गुंजाप्रमाणांजठरामयघ्नी॥ निहंतिवातंकफशूलमात्रंमामातिसारंग्रहणीविकारं॥ निहंतिशुष्कंसितयासमेतंरसोहिआनन्दइतिप्रदिष्टः॥ इत्यानंदरसः॥ ॥दाडिमपुटपाकः॥ जातीफलंसर्पफेनंटंकंगंधंकजीरकं॥ एतानिसमभागानिवलडाडि

मवीजकौ॥ येषयनेनकल्केन पूरयेद्दाडिमीफलं॥ अंगारेतद्वशोधूमचूर्णोनालेपयेद्दृढं॥ अतीसारेस्तंभनः
स्यात्परंदीपनंपाचनं॥ अतीसारेज्वरेचैवरक्तपित्तदृगामये॥ आदौनप्रतिकुर्वीतव्याधिवेगोहिदुस्तरः
॥ इतिअतिसारोज्वरेयचारः॥ ॥ अथसंग्रहणुपचारः॥ अतीसारेनिवृत्तेतुमंदाग्नेरहितांशि
नः॥ भूयः संदूषितोवह्निग्रहणीमभिदूषयेत्॥ साडुष्टावडुशोडुष्टमामेवविमुंचति॥ पक्वंवासरुजंपूतिमु
द्भवंमुद्भवं॥ ग्रहणीरोगमाहुस्तमायुर्वेदविदोजनाः॥ एकैकशः सर्वसश्चदोषैरत्यर्थमुत्थितैः॥ ग्रह
णीमाश्रितंदोषमग्नीरोवदुपाचरेत्॥ अतीसारोक्तविधिनातस्यामंवविपाचयेत्॥ शुंठीसमुस्तातिविषा
गुडूचीधिवेल्लेनक्वथितांसमासां॥ मंदानलत्वेसततामतायांसामानुबंधेग्रहणीगदेव॥ चूर्णांचव्यक

वित्रश्रीविश्वभेषजनिर्मितं॥ तक्रेणसहितंहंतिग्रहिणीदुःखकारिणी॥ रुचकाग्निमरीचानांचूर्णंतक्रेणसे
वितं॥ ग्रहणुदरगुल्मार्शःक्रमांग्रहीहनाशनं॥ आम्रमाम्रातकंजंबुत्वक्कषायेयावयेद्भिषक्॥ यवागूश्चा
लिभिश्चुक्रांभुक्त्वातांग्रहणीजयेत्॥ भल्लातकंत्रिकटुकंत्रिफलालवणत्रिकं॥ अंतर्धूमंहियलिकंगो
पुरीषाग्निनादहेत्॥ सक्षारःसर्पिषापीतोभाज्योवाप्यवचूर्णितः॥ हरोगपांडुग्रहणीगुल्मोदावर्तशूल
नुत्॥ इतिभल्लाटकक्षारः॥ ॥ चित्रकंपिप्पलीमूलंद्वौक्षारौलवणानिच॥ व्योषंहिंग्वाजमोदाच
चव्यमेकत्रचूर्णयेत्॥ गुटिकामातुलुंगस्यदाडिमस्यरसेनवा॥ क्लृप्ताविकवयेत्यामंदीपयत्यपिवान
ले॥ ग्रहिणीदोषिणांतक्रंदीपनंग्राहिलाघवान्॥ यथ्यमम्लप्रयोगित्वान्नवपित्तप्रकोपनं॥ विडंय

वानीविष्टंभेदुष्टेनवारिणा॥ अथरसोयवारः॥ हिंगुलंमरिचंगंधंपिप्पलीटंकणंविषं॥ कनकस्यचवी
जानिसमांशंविजयाद्रवैः॥ मर्दयेद्यामंमात्रंतुचणामात्रावटीकृता॥ भक्षणाद्ग्रहणीहंतिरसःकनक
सुंदरः॥ ॥अग्निमांद्येज्वरभ्रांतिमतिसारंवनाशयेत्॥ दध्यन्नंदापयेत्पथ्यंतथाचक्रोदनंवरेत्॥
इतिकनकसुंदरः॥ शुद्धैः कर्मवराटकैर्गुणतयाभल्लातकांस्तत्समान्प्रातानवबुलकंटकैर्लघुपुटैस्तस्याग्नि
भागंरसं॥ लेलीतेनरमंविचूर्णाजयया मघ्नाभावैश्चिवंयोक्तार्थंग्रहणीकपाटकरसस्त्रैवलकल्वौम
ष्टैः॥ ॥अग्निमांद्यज्वरंतिभ्रमतिसारंवनाश्रयेत्॥ दध्यन्नंदापयेत्पथ्यंतथाचक्रोदनंवरेत्॥ ॥ ग्रहः
इतिग्रहणीकपाटः॥ ॥अथासोरक्षणायवारः॥ पृथक्दोषःसमस्तशोणितात्सहजाशोणिव॥ अर्शो ३३

शिषदूर्वकाणिविभ्राडुदवल्लीत्रयो॥ गुदादावंकुरास्तेषुःसहजाशोणितोद्भवाः॥ एकदोषावाद्यवसोमा
ध्याभ्यन्यास्त्वसाध्यकाः॥ अर्शोतिसारग्रहणीविकाराः प्रायेणाचान्योन्यनिदानभूताः॥ सन्नेनिलेसंतिदी
प्तेरक्षेदतस्तेषुविशेषतोग्निं॥ दुर्नाम्नांसाधनोपायश्चतुर्धापरिकीर्तितः॥ भेषजक्षारशस्त्राग्निसाधात्वंया
॥तिलभल्लातकंपथ्यागुडश्चेतिशमांशकंदुर्नामश्वासदाकाशप्रंश्रीदूर्वांडुवरापदं॥ कृष्णाशिरीष
ज्ञार्कक्षीरैःसामरसेधवैः॥ हरिद्राक्षविगुंजागोमूत्रपिप्पलीघृतैः॥ एतल्लेपत्रयंयोज्यंश्रीवप्रस
र्शोविघाविनाशनं॥ गुडेनशुंठिमथानोयकपित्थात्वांतजीयामथवाद्रिमंवा॥ आषजीर्णोपुगुदामये
षुगुदामयेषुवर्कीविवंधेषुवमिष्टा॥ ज्योतिष्कीवीजकल्कैर्मलेयोरक्तार्थसांहितं॥ सौरसंकंदमादाय

पुष्पाकेन पाचयेत्॥ सतैलगुडसंयुक्तो रसश्चार्शोविकारनुत्॥ अपामार्गस्य बीजानां कल्कस्तंडुलवारिणा
पीतो रक्तार्शसां नाशं कुरुते नात्र संशयः॥ विदारीमूलकल्केन तिलकल्कस्तंडुलवारिणा॥ पीतो रक्तार्शसां
नाशं कुरुते योजितः॥ मधुक्षिरयुतं कुर्याद्रक्तातिसारनाशनः॥ नवनीततिलैः कल्को जेतारक्तार्शसां
मतः॥ नवनीतमिता नागकेसरेश्चापि तद्विधा॥ अर्शोघ्नशर्करायुक्तं सेवितं माक्षिकं सरं॥ नवनीतं च मधु
नाली ऊसर्शोनिसूदनं॥ अर्कं पयः सुधाकांडं कटुकालांबुपल्लवा॥ करवीरस्य मूत्रेण लेपनं
श्रेष्ठमर्शसां॥ कटुतुंबास्तथा दंत्याः शक्रनं कुक्कुटस्य च मुशल्या वाश्वगंधाया चित्रकस्य च यत्नतः
। मूलैस्तुल्यैः कृतं चूर्णमर्कक्षीरेण भावयेत्॥ स्नुहीक्षीरेण मतिमान् वारिणा परिषेचयेत्॥ वस्त्र

वर्तिं गुदस्तेन समालिप्य समंततः॥ गुदे विनिक्षिपेद्यत्नात्प्रातः सायं च बुद्धिमान्॥ वेदना च भवेत्तीव्रा वह्नि
नास्वेदयेद्गुदं॥ नोपशाम्येन्न दानेन तदा चैवोष्णवारिणा॥ विनिवश्य गुदं निष्टे द्वेदनाशमकारणात्॥ अ
ग्राह्यमथान्त्रं वा शिरं जलमापिबेत्॥ गुदस्रावो विनाशार्थं सप्ताहं तु समाहितं॥ विधिमेनं प्रकुर्वीत ग
तसंकस्तु मानवः॥ गुंजासूरनकुष्मांडबीजैर्वर्तिस्तथा गुणा॥ नृकेशाः सप्तनिर्मोकं वृषदंशस्य चर्म च॥
अर्कमूलं समीपत्रमर्शोभ्यो धूपनं हितं॥ स्नुकक्षीरं प्रविशालापस्य थागोमूत्रकल्किनः॥ योजातो गो
रसक्षीरं वह्निमूलाविचूर्णितान्॥ पिबेत्सप्तमे वर्षे नैव भुंजानो गुडं जांगुशान्॥ पिबेद्दरहस्तकं निर
न्नो वा न कामतः॥ सप्ताहं वा दशाहं वा मासार्द्धं मासमेव वा॥ वुरकालविकारज्ञो भिषक्तं च प्रयोजयेत्॥

तंवचित्रकमूलस्यपिष्ट्वा कुंभंप्रलेपयेत्॥ तक्रंवाद्दधिवातक्रज्ञातमर्शोहरंविषेत्॥ गुडव्याघ्रवरावित्लतिलारुष्क
रवित्रकैः॥ अर्शांसिहंतिगुटिकात्वग्निकारंवशीतिता॥ अरलत्वरवह्निसुरेंद्रयवानविरविल्वसमैधवशुं
ठीयुतान्॥ मथितेनविवेद्यदिसप्तदिनंअर्शांसियंतिसमूलयलात्॥ कांवतीविषयाघाशांयवक्षारंवहिं
गुले॥ जलैःपिष्ट्वान्यसेहुद्यस्वंकुर्यादिनत्रयं॥ क्षीरस्वेदंतथाकुर्यात्क्षीरहारीघृतोदनं॥ अर्शोरोगंनिहं
त्याशुसिद्धयोगउदाहृतः॥ अथमंत्रः॥ कंकरकुरकरंतरकंतानिलमीलतिरीयेराजकरंतरआरक्तासारक्ता
ज्ञोज्ञानेहृदमंत्रताकेवंसनहोयेअरिसाज्ञानवुसप्रगतेनकरिताकेसप्तकथिलामारेकांहत्या॥ अस्यमंत्र
स्यप्रत्यहं॥ जपंकुर्यात्॥ समूलकंवंयलद्वयामतश्चुभंभलाटफलमज्ञायाःमरिवसफलंयलं॥ एतचूर्णी

कृतंसूक्ष्मंभक्षयेत्कर्षसंमितं॥ अर्शांकुलानिहंत्याशुसवास्याभ्यंतरानपि॥ अथरसोयवारः॥ समेघप्रतिसारित
वहिरसौताभ्यांवगंधंसमंलांगल्यासितमरशोनवपृक्त्वावत्तावत्यवेत्॥ गोलंज्वालमुपैतिभांडनिहितंतुल्या
मथस्वौषधैःसस्यादर्शांकुठारकास्यपवनार्शःपूर्वकव्याधिषु॥ ॥इत्यर्शांकुठारः॥ अथकांकायनवटिका
॥ पथ्यादलस्यपलपंचकमेवमेकंपलंत्रीवादपिजीरकस्य॥ कृष्णातडुद्भवजटाचविकाग्निशुंठ्याःकृष्णा
दिपंचकमिदंपलतप्रहृद्यं॥ पलाष्टभलातकसंप्रयुक्तंकंदस्त्वहृद्करपलाद्विगुणाःप्रकल्प्य॥ साद्यावशूक
गुडवाद्रमनःसमस्तयोगोगुणोद्विगुणितोवटकीकृतश्च॥ कांकायनेनमुनिनावटकःकिलायमुक्तःप्रज
हितमनेनगुदामयघ्नः॥ क्षाराग्निशस्त्रयतनैरपियेनसिद्धाःसिद्ध्यंत्यनेनवटकेनगुदामयास्ते॥ वेगावु

रोधस्त्रीष्टस्यानात्पुत्कटुकासं॥ यथास्वंदोषत्वंवान्नमशसांपरिवर्जयेत्॥ इत्यशीविकित्सा॥ अथाजीर्णोपचा
वारः॥ अत्यंतुपानाद्विषमाशनाद्वासंधारणात्स्वप्नविपर्ययाच्च॥ कालेदयसात्म्यंलघुचापिभुक्तमन्नंन
पाकंभजतेनरस्यायच्चावलंभतेभुक्तोस्थिरंवापिनजीर्यति॥ आमंपिदग्धंविष्टब्धंरसशेषमजीर्णकं
॥सूचीभिरिवगात्राणितुदंतिसूतेनिलः॥ मत्स्याजीर्णेनसावैद्यैर्विषूचीतिनिगद्यते॥ सामुद्रसौवर्चल
सैंधवानांक्षारयवान्यमजमोदभागः॥ हरीतकीपिप्पलिशृंगवेरंहिंगुविडंगंचसमानिकुर्यात्॥ एतानि
चूर्णानिघृतप्लुतानिभुंजीतपीत्वाऽनुपथमंबुयंच॥ अजीर्णवातंगुदगुल्मवातंवातप्रमेहंविषमंचपात॥वि
षूचिकाकामलपाण्डुरोगंश्वासंचकासंवहरेत्प्रयुक्तं॥ इतिसामुद्रायंचूर्णं॥ त्रिकटुकमजमोदासैं

गुरः
३६

धवंजीरकेद्वेसमधरणाश्चतानामष्टभोहिंगुभागः॥ प्रथमकवलभोजीसर्पिषाचूर्णमेतज्जनयतितठराग्निंवात
गुल्मंनिहंति॥ इतिहिंग्वाष्टके॥ ॥विषूचामतिनक्रार्यापाहुमोदाहःप्रशस्यते॥ गंधकंकुंकुमंवापिदया
त्रिवृजकल्कतः॥ व्योषंकरंजस्यफलंहरिद्रामूलंसमावाप्यवमातुलुंगाः॥ छाया विष्णुक्रांतिकागुटिकागुलिका
कृतास्ताःहन्युर्विषूचीनयतांजनेत्रः॥ लसुनजीरकसैंधवत्रिकटुरामठचूर्णमिदंसमं॥ सपदिनिवुर
सेनविषूचिकांहरितिभोजितिभोगविवक्षरो॥ विडंगभल्लातकचित्रकाभयासनागरास्तुल्यगुडेनस
र्पिषा॥ निहंतियेमंदकृताशनानरामवंतितेवाटुवनुल्यवद्भयः॥ विडंगाद्यावलेहका॥ कुष्ठसैंधवयोःक
ल्कंवृक्षमैलसमन्वितं॥ विषूचीमर्दनंकोलखल्लीभूतिविदारणं॥ निंबरसंचित्रिणीकासमेतंविषूः

चिकाशोषहरंकफंच॥ उष्णेनपीतोपदिष्टंकरोतिसौप्रशाम्यतेयवमनंविरोधः॥ ॥अथरसोपचारः॥ ॥
शुद्धसूतंविषंगंधंप्रत्येकंचसमंसमं॥ मरिचंसर्वतुल्यांशंकंटकारीफलद्रवैः॥ मर्दयेद्भावयेद्यत्नादेक
विंशतिवारकं॥ गुंजात्रयमिदत्वादेत्सर्वाजीर्णाप्रशांतये॥ सर्वोपद्रवसंमुक्तांविसूचीमपिनाशयेत्॥ इति
अजीर्णाकंठकोरसः॥ ॥रसेनगंधंसटंकरोतिसमंविषंयोज्यमतस्त्रिभागं॥ कृयदंशंखवपिनेत्रभा
गांमरीचकंचाष्टगुणंविमर्द्य॥ सुपक्वतंवीररसेनखल्वेशुद्धोभवत्यग्निकुमारकोयं॥ अजीर्णावातंगुद
गुल्मवातंविसूचिकायंविनिहंतिसद्यः॥ इत्यग्निकुमारः॥ ॥व्यायामप्रमदाध्ववाहनरतान्स्त्रिना गुरुः
नतासारिणःशूलश्वासवतस्तथोपरिगतान्क्षिप्तामरुत्पीडितान्॥ क्षीणान्क्षीणकफान्स्त्रिभूतमदद ३७

तान्कृशांस्तथाजीर्णिनोरात्रौजागरि— स्त्रिरूक्षान्कामंदिवास्थापयेत्॥ ॥इत्यजीर्णचिकित्सा॥ अ
थकृमिचिकित्सा॥ ज्वरोविवर्णता शूलंहृद्रोगः छर्दनंभ्रमः॥ भक्तद्वेषोतिसारश्चसंजातकृमिल
क्षणं॥ मुलाखुपरिणाफलदारुहिंगुकायः सकृष्णाकृमिशत्रुल्कः॥ मार्गद्वयेनापिचिरप्रसूतान्कृमी
न्निहंतिकृमिजांश्चरोगान्॥ विडंगंपरिभाद्रागंब्रह्मबीजंपृथक्पृथक्॥ मधुनाकृमिनाशायनिवं
वाहिंगुनायुतं॥ शीतांबुमधुरक्षीरदधिक्षारघृतादिकं॥ सौवीरंयत्रशाखोश्चवर्जयेत्कृमिवान्नर
खदिरःकुटजःपिचुमंदवचात्रिकटुत्रिफलाघृतासहितं॥ पशुमूत्रयुतंपिबसप्तदिनंकृमिकोष्ठि
तान्यपिहंत्यचिरात्॥ निंबूवत्सकविडंगसंयुतंरामठेनसहजंतुनाशनं॥ निंबपत्रमजमोदभागवं

चि॰कि
३८

चूर्णमेवमधुना प्रशस्यते॥ आम्रपर्णादलैः पिष्टैः पिष्टकेन च एरपकान्॥ भुक्त्वा सौवीरकेचानुपिबेत्कृमिहरं
परं॥ सुवर्चिकारामठपत्रिकाकुष्ठविडंगवाहीककरणाग्निविश्वाः॥ यवानिकाग्रंथिकभद्रमुस्तातक्रेण चू
र्णं कृमिकोष्ठहारी॥ सारमालासुपर्णीवातक्रपालाशबीजयुक्॥ हिंग्वजमोदातक्रंवा कृमिरोगं विनाश
येत्॥ क्षीरारिणमांसानि घृतानि चैव दधीनि शाकाग्नि च पत्रवंति॥ सप्ताशतोम्लं मधुरान्नसांश्च कृमीन
जिघांसुः परिवर्जयेत्॥ ॥इति कृमिचिकित्सा॥ ॥अथ पांडुरोगचिकित्सा॥ भूनेत्रगुद
पन्नाभिगुह्यशोफो विवर्णता॥ वलाभिनासनंकार्श्यं पादौचास्यग्निरेचना॥ ज्वररोचकहृल्लासछ
र्दितृष्णाक्लमान्वितं॥ क्षीणांहतेंद्रियं बद्धं सत्यंजेत्पाण्डुरोगिणां॥ पांडुदंतनखोयश्च पांडुनेत्रस्तु

गुरुः
३८

यो भवेत्॥ पाण्डुसंपातदर्शी च पाण्डुरोगी विनश्यति॥ पीतनेत्राननं नखाक्षिदौर्बल्यदाहकृत्॥ कामला
वक्रयितेषा चिरात्स्यात्कुंभलाभला॥ रूक्षपीतशकृन्मूत्रश्लक्ष्णदाहभोरुवान्॥ रक्तनेत्राननस्याज्यः का
मलीछर्दिरोचकी॥ हरीतकीत्रिफलाचूर्णं क्षयतंडाग्निनाशनैः॥ हलीमकं विजानीयादंगमर्दनतृषाभ्रमैः॥ अ
थोपचारः॥ फलत्रिकामृतावासातिक्ताभूनिंबनिंबजः॥ क्वाथः क्षौद्रयुतं हंन्यात्पांडुरोगीसकामला॥ रसमा
मलकानांतु संप्रदुग्धं पत्रपीडितं॥ द्रोणांपंचेक्षुमद्रुग्धे तत्रचेमानि दापयेत्॥ चूर्णितं पिप्पलीमूलं मधु
कद्विपलंतथा॥ प्रस्थं गोक्षनिकायाश्च द्राक्षायाः कल्कमेषितं॥ शृंगवेरं पलेद्वेतु गुडाक्षीर्याः पलद्वयं॥
तुलार्द्धं यर्कलायाश्च घनांभ्रंसमुद्धरेत्॥ मधुप्रस्थसमायुक्तं लेहयेत्यन्त्रसंमितं॥ हलीमकं कामला

चिकि
३९

पांडुत्वं वापि कर्षति ॥ पुनर्नवाभिं वपयेत्लशुंठीनिक्तामृतादार्वीभयाकषायः ॥ सर्वांगशोफोदरपांडुरोगश्वो
ल्पप्रसेकोर्द्धकफामयेषु ॥ अयःक्षितिः भूमणकोलभागैः सर्वैसमं माक्षिकधातुचूर्णं ॥ तैर्मोदकः क्षौद्र
युतोनुतक्रः पांडामयेदूरगतेपिशस्तः ॥ यवगोधूमशाल्यन्नैरसैर्जीगरजैः शुभैः ॥ मुद्गाढकीमसूराद्यैः पां
